Master' Manimala Series No. 59 (Jyotish Section 16)

THE Jatakalankara

OF

SHRI GANESH DAIVAJNA.

With The Commentary

OF

PANDIT HAR BHANU.

EDITED

WITH THE HINDI COMMENTARY

BY

Pt. SHRI SITARAM JHA.

FOURTH EDITION.

PUBLISHED BY

Master Khelari Lal & Sons.,

Proprietors of the 'Sanskrit Book Depot',

Kachaurigali, Benares.

1936.

Price 5 Annas.

समर्पणम्

मास्टरमणिमालायाःक्रमतो नवशरमितोमणिर्जातः
ज्यौतिषशास्त्रविभागे षोडश एवेति नतांशरसा ।
श्रीविश्वेशपदेभ्यः सादरमादौ समर्प्यते भक्त्या ।
तत्पदपङ्कजसेवनलब्धसुखेन प्रकाशकेन मया ॥

चतुर्थसंस्करणम्]　　मूल्यम् ।-)　　[सं० १९९३

श्री :

"अप्रत्यक्षाणि शास्त्राणि विवादस्तेषु केवलम् ।
प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ॥"

तथाच—

"ललाटपट्टे लिखिता विधात्रा षष्ठीदिने याऽक्षरमालिका च ।
तां जन्मपत्री प्रकटीकरोति दीपो यथा वस्तु घनान्धकारे ॥"

इत्यादि ज्यौतिषशास्त्रानुसार मुन्युक्त अदृष्टफलकथन की सत्यता में आज कल भी कुछ प्रमाण है तो समस्त फलित ग्रन्थालङ्कारभूत एक जातकालङ्कार ही है। वास्तव में 'यथा नाम तथा गुणः" यह प्राचीनोक्ति भी इसी ग्रन्थ में चरितार्थ होती है। ऐसी गिरी हुई दशा में भी लोग केवल इसी ग्रन्थ के बल से दैवज्ञ कहलाते हैं। यद्यपि इस विषय को मैं भी जानता हूँ कि आबाल वृद्ध सर्वत्र प्रसिद्ध दैवज्ञ कण्ठस्थहार इस जातकालङ्कार का गुणकथनपूर्वक परिचय कराना हाथ में दीपक लेकर जगत्प्रकाशक श्रीसूर्य भगवान् को दिखाने के समान है तथापि बालकों के लिये कुछ लिख देना उचित समझता हूँ।

इस कराल कलिकाल का प्रभाव ज्यों ज्यों बढ़ता जाता है त्यों २ लोगों की बुद्धि भी मोटी होती जाती है। ऐसी अवस्था में समस्त शास्त्र पढ़ लेने पर भी तत्त्व समझना कठिन है। अत एव सर्वजनोपकारार्थ माननीय 'गणेशदैवज्ञ' ने न जाने कितने परिश्रम से समस्त जातकशास्त्र का सार भाग लेकर सरल संस्कृत मनोहर पद्यों में तन्वादि द्वादश भावों का फल, आयुर्दाय विचार इत्यादि उपयोगी विषयों को स्पष्ट रूप से इस ग्रन्थ में लिख दिये हैं। एकमात्र इस ग्रन्थ को कण्ठस्थ कर लेने से जन्मपत्रानुसार फल

कहने में दूसरे ग्रन्थ का प्रयोजन नहीं हो सकता है। विशेष गुण तो यह भी है कि यह ग्रन्थ (केशवी, बृहज्जातक........आदि) जातक ग्रंथों की आपेक्षा अत्यन्त सरल है। उस पर भी जो कुछ कठिनतायें थीं उनको पं० हरभानु जी ने अपनी सरल संस्कृत टीका से स्पष्ट कर दिया है। ऐसा होने पर भी थोड़े संस्कृत जानने वालों के उपकारार्थ बा० बैजनाथप्रसाद यादव के कथनानुसार मैंने सरल हिन्दी में तात्पर्यार्थ लिखकर उक्त महानुभाव को ही प्रकाशन आदि करने का सर्वाधिकार दे दिया है। यदि इससे सज्जनसमाज कुछ भी उपकृत होंगे तो मेरा प्रयत्न सफलहोगा।

अथार्याभ्यामार्याभिज्ञान् विज्ञापयामि—

यन्मम दृग्दोषाद्वा मुद्रणयन्त्रादशुद्धमिह जातम् ।
संशोध्यं तदखिलमिति साञ्जलिरभ्यर्थयेऽभिज्ञान् ॥
मिथिलादेशान्तर्गतदरभङ्गासन्नचौगमावासी ।
बछुरनशर्मतनूजो ह्यनुजो रामप्रसादविदुषोऽहम् ॥

—श्रीसीताराम झा ।

अथ जातकालङ्कारविषयसूची ।

इति ।

पुस्तकप्राप्तिस्थानम्—

मास्टर खेलाड़ीलाल ऐण्ड सन्स,

संस्कृत बुक डिपो,

कचौड़ीगली, बनारस सिटी ।

❀ श्रीगणेशाय नमः ❀

अथ

जातकालंकारः

वस्वर्णं ब्रह्मविद्यापरिचयचतुरं श्रीशुकं व्यासपुत्रं
नत्वाचार्यं मुनीनां हरिपदकमले प्रेमविश्रामभाजाम् ।
स्विष्टेष्टं स्वेष्टदेवं श्रुतिसमधिगतं माधवं भावयित्वा
भावैरुद्भाव्यतेऽस्मै प्रवरमतिमुदे जातकालङ्कृतश्रीः ॥ १ ॥

अथ ज्योतिर्विंत्तिलकः छंदोलंकृतिकाव्यरचनानिपुणः श्रीगणेशकविः श्रीशुकजातकानुरोधिजातकालंकारनामकग्रंथं चिकीर्षुस्तदादौ निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारक्रमगतं भगवद्विभूतिगुरुगणेशभारतीकर्मप्रणिपातपरं वस्तुनिर्देशात्मकं मंगलमाचरति द्वाभ्यां शार्दूलविक्रीडिताभ्याम्—

सानन्दं प्रणिपत्य सिद्धिसदनं लम्बोदरं भारतीं
सूर्यादिग्रहमण्डलं निजगुरुं भक्त्या हृदब्जे स्थितम् ।
येषामङ्घ्रिसरोरुहस्मरणतो नानाविधाः सिद्धयः
सिद्धिं यान्ति लघु प्रयान्ति विलयं प्रत्यूहशैलव्रजाः ॥१॥

सद्भावाकलितं पदार्थललितं योगाङ्गलीलाचितं
श्रीमद्भागवतं शुकास्यगलितं यच्छ्रीधरस्वामिना ।
सुव्यक्तं क्रियते गणेशकविना गाथोक्ति तज्जातकं
वृत्तस्रग्धरया जनादिसुफलं ज्योतिर्विदां जीवनम् ॥२॥

सानंदमिति। सद्भावाकलितमिति च। गणेशनाम्ना ग्रन्थकर
णकुशलेन मया तज्जातकं वृत्तस्रग्धरया सुव्यक्तं क्रियते स्पष्टार्थं
यथा स्यात्तथा विधीयते इत्यर्थः। किं कृत्वा भक्त्या तान् सिद्धिस
दनभूतान् नत्वा नमस्कृत्य। तान् किंविधान् येषामंघ्रिसरोरुहस्मर
णतः नानाविधाः अनेकविधाः सिद्धयः कार्यसिद्धयः सिद्धिं पूर्णतां
यांति, प्रत्यूहशैलव्रजाः विघ्नपर्वतसमूहाः 'विघ्नोऽन्तरायः प्रत्यूह
इत्यमरः 'व्रजो गोष्ठाध्ववृन्देषु' इत्यमरः। लघु शीघ्रं विलयं यांति
नश्यन्ति 'लघु क्षिप्रमरं द्रुतमि'त्यमरः लघ्विति पदं शीघ्रतावाचक
देहलीदीपकन्यायेनोभयत्रान्वेति। तान्कान् तदाह सिद्धिसद
सिद्धिर्लक्ष्मीः तस्याः सदनं गृहं निवासस्थानमिति यावत् श्रीनिवा
इत्यर्थः 'त्वं सिद्धिस्त्वं स्वधा स्वाहेत्यादि' लक्ष्मीस्तुत्यारम्भे सिद्धि
शब्दस्य लक्ष्म्यां प्रयुक्तत्वात् सिद्धिर्लक्ष्मीरिति नित्यविकल्पोर्थः
कीदृशं सिद्धिसदनं सानन्दं आनन्देन सहितं ब्रह्मण आनन्द
'आनन्दं ब्रह्मणो विद्वानिति' श्रुतेः। सानन्दमिति विशेषणपदं भग
वतोऽन्यत्र नोपपद्यते। ततोन्यदार्तमिति श्रुत्या ब्रह्मणमित्यत्रा
वोपदेशात्, हृदब्जे स्थितं हृदयकमलवासिनं 'सर्वस्य चाहं हृ
सन्निविष्ट' इति भगवद्वचनात्। भक्त्या प्रीतिपूर्वकानुस्मृत्या, गु
श्रीमच्छिवाख्यं, लम्बोदरं विनायकं, भारतीं सरस्वतीं, सूर्यादिग्र
मण्डलं रव्यादीनां ग्रहाणां मण्डलं समूहं च प्रणिपत्य नमस्कृ
शुकास्यगलितं शुकमुनिमुखात् भक्तिभूतं गलितं, गाथोक्ति, गाथा
श्लोकविधुराणां उक्तिर्व्याहारो यस्मिन् तथाभूतम्, कथं व्य
क्रियते यथा शुकास्यात् गलितं श्रीमद्भागवतं महापुराणं श्रीधरस्
मिना व्यक्तं कृतमित्यध्याहारः। कथम्भूतं भागवतं जातकं
सद्भावाकलितं सन् प्रशस्तो भावो विष्णुभक्तिः तेनाकलितं विशि
(जातकपक्षे)—सद्भावैस्तन्वादिद्वादशभावैस्तात्पर्यैर्वा विशिष्टं, प
र्थललितं पदार्थैः परमभक्त्युद्योतकैः श्रवणकीर्तनादिभिः ल
रुचिरं, (जातकपक्षे)—पदार्थैः सानन्दसदनादिभिर्मनोहरं, यो

ङ्गलीलार्चितं योगो भक्तियोगस्तस्याङ्गानि यमनियमप्राणायामप्रत्याहारध्यानधारणासमाधयः' तेषां लीला उपदेशविशेषास्ताभिरर्चितं महितं, (जातकपक्षे)—योगाङ्गानि ग्रहभावादीनि तेषां लीला योग्यत्वेन घटनविशेषास्ताभिरर्चितं प्रशस्तमित्यर्थः । ज्योतिर्विदां जीवनं ज्योतिः परमात्मा 'नारायणः परं ज्योतिरिति' श्रुतेः तद्विदां ब्रह्मविदां जीवनं कालक्षेपयोग्यं, (जातकपक्षे)—ज्योतिर्विदां गणकानां जीविकाप्रदत्वाज्जीवनमित्यर्थः । वृत्तस्रग्धरया स्रग्धरावृत्तैरित्यर्थः । जात्यभिप्रायेणैकवचनोक्तिः तस्य लक्षणं श्रुतबोधे "चत्वारो यत्र वर्णाः प्रथममित्यादि" ॥ १—२ ॥

गणेशञ्च दिनेशञ्च नत्वा सीतां सरस्वतीम् ।
जातकालङ्कृतेर्भाषा टीकां कुर्वे सुबोधिनीम् ॥

भाषार्थ—जिनके चरणकमलों के स्मरण से अनेक प्रकार की कार्यसिद्धियाँ शीघ्र ही परिपूर्ण होती हैं और विघ्नरूप पर्वतों का शीघ्र ही नाश होता है ऐसे आनन्दयुक्त सबके हृदयकमल में रहने वाले सिद्धिसदन (श्रीपति) तथा लम्बोदर (गणेश) और भारती (सरस्वती) तथा सूर्यादि ग्रहसमूह और अपने गुरु को भक्तिपूर्वक प्रणाम करके मैं गणेशकवि पूर्वाचार्योक्त जातक को प्रकट करता हूँ ॥ १ ॥

किस प्रकार प्रकट करता हूँ ?—जिस प्रकार शुकदेव मुनि के मुखारविन्द से गिरे हुए श्रीमद्भागवत को श्रीधर स्वामी ने किया । यह जातक कैसा है कि तन्वादि द्वादश भावों के फल से संयुक्त, तथा पद और अर्थों से ललित (मनोहर) और योगों के अङ्गों (ग्रहभावादिकों) से प्रशस्त और गाथोक्ति (गाथाओं की उक्ति है जिसमें) तथा जनादिसुफल (मनुष्यादिकों का शुभाशुभ फल है जिसमें) और ज्योतिश्शास्त्र जानने वालों का जीवन । श्रीमद्भागवत कैसा है ? —सद्भाव (प्रशस्त विष्णु की भक्ति) से सहित पदार्थ (भक्त्युत्पादक श्रवण कीर्तन आदि) से मनोहर तथा योग शास्त्र के अङ्ग (नियमादि) की

लीला (उपदेश) से प्रशस्त, गाथाओं की उक्ति है जिसमें, और जना-
दिकों का सुन्दर फल (भक्ति ज्ञान रूप) है जिसमें तथा ज्योतिः (पर
ब्रह्म) को जानने वालों का जीवन (कालक्षेप योग्य) ॥ २ ॥

ननु श्रीधरस्वामिवद्भवतापि शुकजातकव्याख्याने कर्तव्ये ग्रंथा-
रम्भो नोचितस्तत्राह—

यत्पूर्वं परमं शुकास्यगलितं सज्जातकं फक्किका-
रूपं गूढतमं तदेव विशदं कुर्वे गणेशोऽस्म्यहम् ।
दैवज्ञः सुतरां यशःसुखमतिः श्रीहर्षदं स्रग्धरा-
वृत्तैश्चारु नृणां शुभायनपदं श्रीमच्छिवानुज्ञया ॥३॥

यत्पूर्वमिति । गणेशनामाहं श्रीमच्छिवानुज्ञया वेदशास्त्रसम्प-
न्नशिवनाम्नो गुरोराज्ञया तत्प्रीत्यर्थमितिभावः । पूर्वभावकाले शुका-
स्यगलितं छन्दोरहितत्वात् फक्किकारूपं गूढतमं अतिशयेन गहनं न
तु विशदं, परमं सारार्थनिरूपणेनोत्कृष्टं यज्जातकं तदेव स्रग्धरावृत्तै-
श्चारु रुचिरं विशदं कुर्वे, फक्किकारूपस्य गूढतमस्य विशदीकरण-
श्लोकैरेवोचितमित्याशयः । कथंभूतो गणेशः दैवज्ञोऽदृष्टवेत्ता कर्त-
व्यग्रंथभावितवार्तादर्शीति गूढभावः । सुतरां यशःसुखमतिः
अतिशयितकीर्तिजन्यसुखे मतिर्यस्य सः, प्रयोजनगर्भमिदं विशे-
षणं यशोऽन्यसुखार्थमितिभावः । कीदृशं श्रीहर्षदं श्रियं हर्षं च
ददाति तत्, शुभायनपदं शुभायनानां शुभजातकानां आनंदसिद्धि
सदनादीनां पदं स्थानम् ॥ ३ ॥

भा॰—पूर्व समय में शुकदेवजी के मुखकमल से गिरा हुआ
मनुष्यों को सम्पत्ति तथा आनन्द देनेवाला और मनुष्यों का मंगलास्पद,
फक्किका रूप अत्यन्त कठिन जो जातक है उसीको यश और सुख को
चाहने वाला दैवज्ञ (ज्यौतिषी) मैं गणेश कवि श्री शिव नामक गुरु की
आज्ञा से स्रग्धरा छन्दों में विशद (अत्यन्त सरल) करता हूँ ॥ ३ ॥

ननु सत्कवीनां हर्षप्रदं त्वदीयं जातकं न स्यादित्याह—

भूयांसः सन्ति भूमौ निजमतिरचनाशालिनः काव्यगुम्फे
सङ्ख्यावन्तस्तथापि प्रचुरपरगुणानन्दलीलां भजन्ते ।
चञ्चद्गाम्भीर्यपद्मा- विबुध-विटपिनां जन्मसम्प्राप्तिभूतो
मर्यादां न स्वकीयान्त्यजति किल महारत्नधामा*सरस्वान् ४

भूयांस इति । भूमौ यद्यपि काव्यगुम्फे गद्यपद्यरचनायां निजमतिरचनाशालिनः निजमत्या काव्यरचना तया शालंते ते भूयांसो निपुणाः संख्यावन्तः कवयः संति, तथापि प्रचुरपरगुणानन्दलीलां भजंते प्रकृष्टपरगुणानुभवजन्यानंदलीलां उद्वहंति नोपेक्षंत इत्यर्थः। "परगुणपरमाणून् पर्वतीकृत्य नित्यं निजहृदि विकसन्तः सन्ति सन्तः कियंत" इत्युक्तत्वात्प्रकृत्यापरगुणानुभवजन्यप्रमोद एव तेषां लीलेति भावः । उक्तमर्थमर्थान्तरन्यासेन द्रढयति चंचद्गांभीर्यं च पद्मा च विबुधविटपी चेति चंचद्गांभीर्यपद्माविबुधविटपिनः चञ्चतो द्योतमाना गांभीर्यादयश्च एतेषां जन्मसंप्राप्तिभूतः आश्रयोऽपि रत्नधामापि रत्नगृहमपि सरस्वान् समुद्रः स्वकीयां मर्यादां स्थितिं न त्यजति, तथैव कवयोऽपि प्रमोदैरन्वितिभावः । गांभीर्यं निश्चलता, पद्मा लक्ष्मीः, विबुधविटपी पारिजातः । अत्र रत्नधामा, इति पदं चिन्त्यं धामशब्दस्य नपुंसकलिंगत्वात्, अत्र तत्पुरुषसमासे परवल्लिंगं द्वंद्वतत्पुरुषयोरित्यनुशासनेन रत्नधामेति नपुंसकांतत्वस्यादंतत्वात् अतो रत्नधामाप्युदन्वानिति पाठः समीचीनः ॥ ४ ॥

भाषा०—इस पृथ्वी पर ऐसे अनेक कवि लोग हैं जो अपनी बुद्धि से काव्य रचना करने में अति प्रवीण हैं तथापि दूसरों के उत्तम गुणों से अत्यन्त आनन्द पाते हैं। जैसे अत्यन्त अगाध और सर्व सम्पत्तिप्रदा

---

* 'ऽप्युदन्वान्' इति पाठः साधु ।

लक्ष्मी तथा कल्पवृक्ष का उत्पत्ति स्थान अति महान् रत्नों का भवन होकर भी समुद्र अपनी मर्यादा को नहीं छोड़ता। भाव यह है, कि इसी प्रकार विज्ञजन मेरी कृति को देखकर अवश्य आनन्दित होंगे ॥४॥

अथ तन्वादीनां सामान्यविशेषसंज्ञाः कथ्यंते यावदध्यायम्। आदौ तावल्लग्नादीनां देहादिसंज्ञां तेषां सर्वेषां भावसंज्ञां च शार्दूलविक्रीडितेनाह—

देहं द्रव्यपराक्रमौ सुखसुतौ शत्रुः कलत्रं मृति-
र्भाग्यं राज्यपदं क्रमेण गदिता लाभव्ययौ लग्नतः।
भावा द्वादश तत्र सौख्यशरणं देहं मतं देहिनां
तस्मादेव शुभाशुभाख्यफलजः कार्यो बुधैर्निर्णयः॥५॥

देहं द्रव्यपराक्रमाविति। लग्नत इति ल्यब्लोपे पञ्चमी लग्नमारभ्य क्रमेण देहादयो द्वादशभावाः गदिताः उक्तास्तत्र लग्नं देहो देहभावः द्वितीयतृतीयौ द्रव्यपराक्रमौ द्रव्यपराक्रमभावौ, चतुर्थपञ्चमौ भावौ सुखसुतौ, षष्ठः शत्रुः, सप्तमभावः कलत्रं, अष्टमो मृतिः, नवमो भाग्यं, दशमं राज्यपदं, एकादशद्वादशौ लाभव्ययौ लाभव्ययनामकौ, तत्र तेषु देहिनां देहः सौख्यशरणं सुखाश्रयं मतं अतो बुधैर्ज्योतिर्विद्भिः तस्माद्देहादेव लग्नभावादेव शुभाशुभाख्यफलजो निर्णयो वक्ष्यमाणप्रकारेण कार्यः॥ ५॥

भाषा०—अब तन्वादि द्वादशभावों की संज्ञा कहते हैं—देह १ द्रव्य २ पराक्रम ३ सुख ४ सुत ५ शत्रु ६ कलत्र ७ मृति (मृत्यु) ८ भाग्य ९ राज्यपद १० लाभ ११ व्यय १२ ये क्रम से लग्नादि द्वादश भावों की संज्ञा हैं। यहां देह मनुष्यों का सुख स्थान है इसलिए विद्वान् उसीसे शुभाशुभ फल का निर्णय करें। भाव यह है कि तनुभाव (लग्न) के शुभ होने से सब फल शुभ होता है, अशुभ होने से अशुभ॥ ५॥

लग्नं मूर्तिस्तथाङ्गं तनुरुदयवपुः कल्पमाद्यं ततः स्वं
कोशार्थाख्यं कुटुम्बं धनमथ, सहजं भ्रातृदुश्चिक्यसंज्ञम्।
अम्बापातालतुर्यं हिबुकगृहसुहृद्वाहनं यानसञ्ज्ञं
बन्ध्वाख्यं चाम्बु नीरं जलमथ तनयं बुद्धिविद्यात्मजाख्यम्।

लग्नमिति। लग्नं मूर्त्यादिशब्दवाच्यमिति मुनय ऊचुरिति तृतीयेनान्वयः। मूर्तिः, अंगं, तनुः, उदयं, वपुः कल्पमिति समाहारः। उदयो, वपुः, कल्पमाद्यं, तन्वादयो लग्नपर्यायाः इति प्रथमभावः। ततोऽनंतरं धनं, स्वं, कोशार्थाख्यं, कोशश्चार्थश्च कोशार्थौ आख्या यस्य स तथा तत्तथोक्तं धनं स्वादिसंज्ञमूचुरित्यन्वयः। एवमग्रेपि सहजं, भ्रातृदुश्चिक्यसंज्ञं तृतीयभावः। अम्बापातालतुर्यं हिबुकगृहसुहृद्वाहनं यानसंज्ञं याननामकमेवं बंध्वाख्यं बन्धुसंज्ञं, अम्बु नीरं जलं एते चतुर्थभावस्य पर्याया इति भावः। अथ तनयं बुद्धिविद्यात्मजाख्यं वाक्स्थानं पञ्चममित्यग्रिमेण संबंधः पञ्चमभावस्यैते पर्यायाः॥ ६॥

भाषा०—अब देहादि द्वादश भावों का संज्ञान्तर कहते हैं—लग्न, मूर्ति, अङ्ग, तनु, उदय, वपु, कल्प और आद्य; ये आठ तनुभाव की संज्ञा हैं। तथा स्व, कोश, अर्थ, कुटुम्ब, धन, ये पांच धन भाव के नाम हैं। एवं सहज, भ्रातृ, दुश्चिक्य, ये तृतीय भाव की संज्ञा हैं। अम्बा, पाताल तुर्य हिबुक, गृह, सुहृद्, वाहन, यान, बन्धु, अम्बु, नीर, जल, ये बारह नाम चतुर्थ भाव के हैं। और तनय, बुद्धि, विद्या और आत्मज—॥ ६॥

वाक्स्थानं पञ्चमं स्यात्तनुजमथ रिपुद्वेषिवैरिक्षताख्यं
षष्ठं जामित्रमस्तं स्मरमदनमदद्यूनकामाभिधानम्।
रन्ध्रायुश्छिद्रयाम्यं निधनलयपदं चाष्टमं मृत्युरन्यद्
गुर्वाख्यं धर्मसञ्ज्ञं नवममिह शुभं स्यात्तपोमार्गसंज्ञम्॥७॥

वाक्स्थानमिति। अथ षष्ठं रिपुद्वेषिवैरिक्षताख्यमूचुः, रिपुद्वेषिवैरिक्षतनामकमित्यर्थः। अथ सप्तमं जामित्रास्तस्मरमदनमदद्यूनकामाभिधानं ऊचुः सप्तमं, जामित्रास्तस्मरमदनादिनामकमित्यर्थः। अथाष्टमं रन्ध्रायुश्छिद्रनिधनलयपदं मृत्युं अष्टमं रंध्रादिनामकमित्यूचुः। अतो नवममिह शास्त्रे गुर्वाख्यं धर्मसंज्ञं शुभं तपोमार्गसंज्ञमूचुः ॥ ७ ॥

भाषा०—वाक्, पञ्चम और तनुज, (ये तीन और चार पूर्व श्लोक में एवं सात संज्ञा पञ्चम भाव की है)। तथा रिपु, द्वेषी, वैरी, क्षत, ये षष्ठ भाव की संज्ञा है। तथा जामित्र, अस्त, स्मर, मदन, मद, द्यून, और काम, ये सप्तम भावकी संज्ञा है। रन्ध्र, आयु, छिद्र, याम्य निधन, लयपद, अष्टम और मृत्यु, ये अष्टम भाव की संज्ञा है। और गुरु, धर्म, शुभ, तप, मार्ग, ये नवम भाव के नाम हैं ॥ ७ ॥

ताताऽऽज्ञामानकर्मास्पदगगननभोव्योममेषूरणाख्यं
मध्यं व्यापारमूचुर्दशममथ भवं चागमं प्राप्तिमायम्।
इत्थं प्रान्त्यान्तिमाख्यं मुनय इह ततो द्वादशं रिष्फमाहु-
र्ग्राह्यं बुद्ध्वा प्रवीणैर्यदधिकममुतः सञ्ज्ञया तस्य तच्च ॥ ८ ॥

तातेति। अथ तनोर्दशमं तातादिनामकमूचुरिति आज्ञा मानं, कर्म, आस्पदं, गगनं, नभो, व्योम मेषूरणं, मध्यं व्यापारमूचुरिति स्फुटा व्यक्तिः। अथ भवमेकादशमगमं प्राप्तिमायमूचुरित्थमुक्तम। ततो द्वादशं प्रान्त्यान्तिमाख्यं प्रान्त्यनामकं, अन्तिमं रिष्फं इत्यूचुः, यदमुतः प्रोक्तात्पर्यायसमुदायादधिकं दृश्यते तस्य तस्य यन्नामोक्तं नामसंज्ञायां पर्यायं बुद्ध्वा तत्तुल्यार्थशुद्धं ग्राह्यं यथा वित्तशब्देन तत्तुल्यार्थे धनं सहोत्थशब्देन सहजभावो ग्राह्य इति ॥ ८ ॥

भाषा०—तात, आज्ञा, मान, कर्म, आस्पद, गगन, नभस्, व्योम, मेषूरण, मध्य और व्यापार ये दशम भाव के नाम हैं। एवं आगम,

ाशि और आय ये एकादश भाव के नाम और प्रान्त्य, अन्तिम, रिष्फ
ा द्वादश भाव के नाम प्राचीन मुनिगणों ने कहा है। अनन्तर इससे
अतिरिक्त संज्ञा भी उन उन भावों की संज्ञा द्वारा अपनी बुद्धि से
विद्वान ग्रहण करें, जैसे वित्त शब्द से तुल्यार्थ होने से धन भाव की
ंज्ञा ग्रहण करे। इस प्रकार धन की जितनी संज्ञाएँ हैं उनसे धन भाव
ग्रहण करे, एवं सहोत्थादि से सहज भाव, इत्यादि ॥ ८ ॥

आद्यं तुर्यं कलत्रं दशममिह बुधैः केन्द्रमुक्तं त्रिकोणं
पुत्रं धर्माख्यमुक्तं पणफरमुदितं मृत्युलाभात्मजार्थम्।
धर्मश्चापोक्लिमाख्यं व्ययरिपुसहजं कण्टकाख्यं हि केन्द्रं
चैतच्चातुष्टयं स्यात्त्रिकमिह गदितं वैरिरिःफान्तकाख्यम् ॥९॥

आद्यमिति। इह शास्त्रे बुधैः आद्यं चतुर्थं सप्तमं दशमं केन्द्र-
मुक्तं, तथा कण्टकाख्यं चतुष्टयं च स्यात्। चतुष्टयमेव चातुष्टयम्।
पंचमं नवमं त्रिकोणमुक्तं, मृत्युलाभात्मजार्थमष्टममेकादशं पंचमं
द्वितीयं पणफरमुक्तम्। नवमं द्वादशं षष्ठं सहजं आपोक्लिमसंज्ञं
उदितं, वैरिरिःफांतकाख्यं षष्ठद्वादशाष्टमं त्रिकमुक्तम् ॥ ९ ॥

भाषा०—इस शास्त्र में प्राचीन विद्वानों ने प्रथम १ चतुर्थ ४ सप्तम
७ दशम १० इन भावों को केन्द्र संज्ञा तथा पञ्चम ५, नवम ९ इन
दोनों की त्रिकोण संज्ञा, एवं द्वितीय २ पञ्चम ५ अष्टम ८ एकादश ११
इनकी पणफर संज्ञा तथा तृतीय ३ षष्ठ ६ नवम ९ द्वादश १२ इनकी
आपोक्लिम संज्ञा कही है। तथा कण्टक और चतुष्टय केन्द्र ही की संज्ञा
है। और षष्ठ ६ अष्टम ८ और द्वादश १२ इनकी त्रिक संज्ञा कही है।९।

अथ मित्रशत्रूनेकेन शार्दूलविक्रीडितेनाह—

चन्द्रेज्यक्षितिजा रवीन्दुतनयौ गुर्विंदुसूर्याः क्रमा-
च्छुक्रार्कौ रविचन्द्रभूमितनया ज्ञार्कौ सितज्ञौ मताः।

अर्कादेः सुहृदः समा अथ बुधः सर्वे हि शुक्रार्कजौ
भौमाचार्ययमा यमः कुजगुरू पूज्यः परे वैरिणः ॥ १० ॥

चंद्रेति। चंद्रेज्यक्षितिजादयः अर्कादेः सुहृदः, बुधादयः समाः, अन्ये वैरिणो मताः मुनिभिरिति शेषः। सूर्यस्य चंद्रेज्यक्षितिजाः सुहृदो मित्राणि, बुधः समोऽन्ये वैरिणः। रविबुधौ चंद्रस्य मित्रे, सर्वे अन्ये समाः। गुर्विन्दुसूर्याः भौमस्य मित्राणि, शुक्रशनी समौ, बुधः शत्रुः। शुक्रसूर्यौ बुधस्य मित्रे, भौमगुरुशनयः समाः, चंद्रः शत्रुः। रविचंद्रभौमाः गुरोर्मित्राणि, शनिः समः, बुधशुक्रौ शत्रू। बुधशनी शुक्रस्य मित्रे, कुजगुरू समौ, रविचंद्रौ शत्रू। सितज्ञौ शनेर्मित्रे, गुरुः समः, रवीन्दुभौमाः शत्रवः ॥ १० ॥

ग्रहमैत्रीचक्रम्।

ग्रहाः	र.	चं.	मं.	बु.	गु.	शु.	श.
मित्र	चं. गु. मं.	र. बु.	गु. चं. र.	शु. र.	र. चं. मं.	बु. श.	शु. बु.
सम	बुध.	म. गु. शु. श.	शु. श.	मं. गु. श	श.	मं. गु	गु.
शत्रु	शु. श.	०	बु.	चं.	बु. श.	र. चं.	र. चं. मं.

भाषा०—अब ग्रहों के मित्र-शत्रु कहते हैं—चन्द्रमा, मङ्गल, बृहस्पति ये रवि के मित्र हैं। रवि और बुध चन्द्रमा के मित्र हैं। बृहस्पति, चन्द्रमा, और रवि, ये मंगल के मित्र हैं। शुक्र और सूर्य बुध के मित्र हैं। रवि, चन्द्रमा और मंगल ये बृहस्पति के मित्र हैं। बुध और

शनि ये शुक्र के मित्र हैं। तथा बुध और शुक्र ये शनैश्चर के मित्र हैं। बुध सूर्य का सम हैं। मित्र से अतिरिक्त सब ग्रह चन्द्रमा के सम हैं। शुक्र और शनि मंगल के सम हैं। मंगल, बृहस्पति, शनि ये बुध के सम हैं। शनि बृहस्पति का सम है। मंगल और बृहस्पति ये शुक्र के सम है। बृहस्पति शनि का सम है। अवशिष्ट रव्यादि ग्रहों के शत्रु हैं ॥ १० ॥

अथ गहाणां दृष्टीः पृथ्वीवृत्तेनाह–

तृतीयदशमे ग्रहो नवमपञ्चमेऽष्टाम्बुनी
क्रमाच्चरणवृद्धितः स्मरगृहं ततः पश्यति।
कुजः सितबुधौ शशी रविबुधौ सितक्ष्मासुतौ
गुरुर्यमशनी गुरुर्भवनपा इमे मेषतः ॥ ११ ॥

तृतीयेति। तृतीयदशमादिषु चरणवृद्धितः पश्यति, तत्र तृतीयदशमे चरणदृष्ट्या पश्यति, नवमपंचमे द्विचरणदृष्ट्या पश्यति, अष्टांबुनी अष्टमचतुर्थे चरणत्रयदृष्ट्या पश्यति, स्मरगृहं सप्तमं पूर्णं पश्यतीत्यर्थः। तृतीयदशमे शनिः, नवमपञ्चमे गुरुः, चतुर्थाष्टमे भौमः पूर्णदृष्ट्या पश्यतीति जातकांतरे सविशेषो ज्ञेयः। इमे कुजादयो मेषतः मेषमारभ्य भवनपाः राशीशाः मेषस्य कुजः, वृषस्य शुक्रः, मिथुनस्य बुधः, कर्कस्य चंद्रः सिंहस्य रविरित्यादि ॥ ११ ॥

स्पष्टार्थं राशिस्वामिचक्रम्।

राशयः	मे.	वृ.	मि	क.	सिं.	क.	तु.	वृ.	ध.	म.	कु.	मी.
ग्रहाः	मं.	शु.	बु.	चं.	सू.	बु.	शु.	मं.	वृ.	श.	श.	वृ.

भाषा०—अब ग्रहों की दृष्टि कहते हैं–तृतीय और दशम भवन को ग्रह एक चरण से, तथा नवम और पंचम को दो चरण से, तथा चतुर्थ

और अष्टम को तीन चरण से, एवं सप्तम भवन को चारो चरण (सम्पूर्ण दृष्टि) से ग्रह देखता है । तथा मंगल, शुक्र, बुध, चन्द्रमा, रवि, बुध, शुक्र, मंगल, बृहस्पति, शनि, शनि, बृहस्पति, ये क्रमशः द्वादश राशियों के स्वामी हैं ॥ ११ ॥

अध्यायं समापयति शालिन्या —

हृद्यैः पद्यैर्गुम्फिते सूरितोषे-
ऽलङ्काराख्ये जातके मंजुलेऽस्मिन् ।
सञ्ज्ञाध्यायः श्रीगणेशेन वर्यै-
र्वृत्तैर्दिग्भिः संयुतोऽयं प्रणीतः ॥१२॥

इति जातकालङ्कारे प्रथमोऽध्यायः ॥ १ ॥

हृद्यैरिति । श्रीगणेशेन विदुषा उत श्रीविशिष्टेन गणेशेन अलंकाराख्ये अलंकारनामके मंजुले रुचिरे हृद्यैः पद्यैर्गुम्फिते मनोहरैः श्लोकै रचितेऽस्मिन ग्रन्थे वर्यैः श्रेष्ठैः दिग्भिर्दशभिः वृत्तैः श्लोकैः अयं आदिमः प्रथमः संज्ञाध्यायः प्रणीतः उक्त इत्यर्थः ॥ १२ ॥

इति श्रीहरभानुविरचितायां जात० टीकायां प्रथमोऽध्यायः ॥ १ ॥

भाषा०—मनोहर पद्य से बने हुए पण्डितों को प्रसन्न करने वाले इस सुन्दर जातकालंकार में श्री गणेश कवि ने उत्तम दश श्लोकों के सहित इस प्रथम संज्ञाध्याय को बनाया है ॥ १२ ॥

इति ज्यो० आचार्यश्रीसीतारामशर्मकृतजातकालंकार-
भाषाटीकायां प्रथमोऽध्यायः ॥ १ ॥

अथ भावाध्यायः ॥ २ ॥

अथ भावाध्यायो व्याख्यायते। तत्र कविः स्वविनयं विशदयन् भावफलं वक्तुं पृथिवीवृत्तेन प्रतिजानीते—

शुकाननसरोरुहोद्गलितमत्र भूमीतले
फलं परमसुंदरं सकलमाकलय्याधुना।
ब्रवीमि तनुभावतः प्रवरदैवविित्तोषदं
यदत्र मम चापलं किमपि तत्क्षमध्वं बुधाः!॥ १॥

शुकेति। शुकाननसरोरुहाद्गलितं अहं तनुभावतः तत आरभ्य तत्फलं जातकफलं अधुना ब्रवीमि। हेबुधाः! पंडिताः! अत्र वचने मम यत्किमपि चापलं स्यात् तद्यूयं क्षमध्वं इति प्रार्थना। किं कृत्वा ब्रवीमि—अत्र भूमितले शुकाननसरोरुहात् शुकमुखारविंदाद्गलितं शिष्यद्वारा प्राप्तं, परमसुंदरं सकलं फलं आकलय्य विचार्य, कथंभूतं फलं प्रवरदैवविदां तोषदं उत्कृष्टज्योतिर्विदामानंददम् 'अन्यत्रोक्तमन्यतो ग्राह्यमि'तिन्यायेन प्रथमं ग्रहभावस्पष्टता तेषां वलं च ज्ञातव्यं ततो भावसामान्यफलांतरं शुभपापमिश्रग्रहदृष्टियोगादिकं भावषड्वर्गा भावेशस्योदयास्तादिकं ज्ञातव्यम्। तदुक्तं पृथुयशसा—'यो यो भावः स्वामिदृष्टो युतो वा सौम्यैर्वा स्यात्तस्य तस्यास्ति वृद्धिः। पापैरेवं तस्य भावस्य हानिर्निर्देष्टव्या प्रश्नतो जन्मतो वा'। तत्र विशेषो गर्गजातके—"नीचस्थो रिपुगेहस्थो ग्रहो भावविनाशकृत॥ उदासीनो ग्रहो मध्यो मित्रस्वर्क्षत्रिकोणगः। स्वोच्चस्थश्च ग्रहोऽप्येवं भाववृद्धिकरः स्मृतः"॥ व्ययाष्टमषष्ठभावेषु विपरीतफलमाह उशनाचार्यः—"सौम्याः पुष्टिं पापा विपर्ययं संश्रिता ग्रहाः कुर्युः। मूर्त्यादिषु निधानांत्ये रिपुभावे व्युत्क्रमात्फलदाः॥" अन्यच्च 'सौम्यवर्गाश्रिता भावाः शुभतां प्राप्नुवंति हि। पापवर्गाधिका नेष्टास्तन्वाद्या नात्र संशयः॥ लग्नलग्नाधिपौ स्यातां बलाधिकतरौ यदि। तत्फलानां प्रवृद्धिःस्याद्धीनो हानिकरः स्मृतः॥ एवं भावेषु सर्वेषु भावभावेशयोर्बलात्। ततो जनुषि वक्तव्या हानिर्वृद्धिश्च कोविदैरिति'॥ सर्वार्थचिंतामणौ— लग्नादिभावाद्रिपुरंध्ररिःफे पापग्रहास्तद्भवना-

दिनाशः। सौम्यास्तु तेषूक्तफलप्रदाः स्युस्तन्वादिकानां फलमेव माहुः ॥ १ ॥ यद्भावनाथो रिपुरंध्ररिःफे दुःस्थानपो यद्भवनस्थितो वा । तद्भावनाशं कथयंति तज्ज्ञाः शुभेक्षिते तद्भवनस्य सौख्यम् ॥ २ ॥ तत्तद्भावात्त्रिकोणे स्वसुखमदनभे चास्पदे सौम्ययुक्ते पापानां दृष्टिहीने भवनपसहिते पापखेटैरयुक्ते। भावानां पुष्टिमाहुस्त्वथ च शुभकरीमन्यथात्वे प्रणाशं मिश्रं मिश्रैर्ग्रहेन्द्रैः सकलमपि तथा मूर्तिभावादिकानामिति ॥ १ ॥

भाषा०—अब भावाध्याय कहते हैं—शुकदेवमुनि के मुखारविन्द से इस पृथ्वी पर गिरा हुआ, दैवज्ञों को तुष्ट करने वाला जो परम सुन्दर फल हैं उन सबको मैं संकलन करके तन्वादि भावों का फल कहता हूँ इसमें जो कुछ मेरी चपलता हो उसे विज्ञजन क्षमा करें ॥ १ ॥

अथ त्रिभिः श्लोकैस्तनुभावविशेषमाह—

देहाधीशः सपापो व्ययरिपुमृतिगश्चेत्तदा देहसौख्यं
न स्याज्जन्तोर्निजर्क्षे व्ययरिपुमृतिपस्तत्फलस्यैव कर्ता।
मूर्तौ चेत्क्रूरखेटस्तदनु तनुपतिः स्वीयवीर्येण हीनो
नानातङ्काकुलः स्याद्व्रजति हि मनुजो व्याधिमाधिप्रकोपम्॥

देहाधीश इति। देहाधीशो लग्नस्वामी सपापः पापग्रहेण युक्तः व्ययरिपुमृतिगः द्वादशषष्ठाष्टमान्यतमस्थानगतश्चेत्तदा जातस्य देहसौख्यं न स्यात्। अस्य योगस्य धनादिभावे विचार्यत्वद्योतनाय प्रथममुक्तिरिति गम्यते 'यद्भावनाथो रिपुरन्ध्ररिःफे तद्भावनाशं कथयंति तज्ज्ञाः" इति प्राक् लिखितत्वात्। अन्यदाह व्ययेशो व्यये, षष्ठेशः षष्ठे, अष्टमाधीशोऽष्टमे च तत्फलस्यैव कर्त्ता देहसौख्याभावकर्ता स्यात्। अयमर्थो यवनमतेन विरुद्धः। यथा बृहज्जातके— "रिपुभवनपे रिपुस्थे नीरुग्वैरीसुखी कृपणः। निधनपतौ निधनस्थे व्यवसायी व्याधिवर्जितोऽभ्युदितः" ॥ विरोधशमनाय अयमर्थो

बोध्यः। देहाधीशे व्ययरिपुमृतिगे सति तद्भवनपेऽपि तत्रस्थे शुभफलं स्यादिति न वाच्यम्। पूर्वोक्तयोगे सति व्ययरिपुमृतिपः स्वभवनगतश्चेत्तत्फलस्यैव कर्तेति वाच्यम्। योगानामचिंत्यफलत्वादिति। अथान्ययोगमाह मूर्त्ताविति॥ मूर्तौ लग्ने क्रूरग्रहः क्रूरखेटः, तनुपतिः लग्नेशः स्वीयवीर्येण हीनः स्वकीयबलहीनश्चेत्तदा जातो मनुजः नानातंकाकुलः अनेकरोगाकुलः व्याधिं रोगं आधिप्रकोपं चिन्ताव्याप्तत्वं व्रजति प्राप्नोति। बलहीनत्वं परपुंग्रहनीचास्तत्वादिभिर्ज्ञेयम्। तदुक्तं जातकामृते—'स्वोच्चं मूलत्रिकोणं स्वगृहमधिसुहृद्गेहकं मित्रकं स्यादौदासीन्यं समर्क्षं रिपुभमधिरिपोर्भं च नीचाभिधानम्। पूर्वं पूर्वं बलीयः परमपरमिदं हीनसत्त्वं तदस्मादि" त्यादिवत्पद्धतिप्रकारमतेन उत्तमबलत्वं च ज्ञेयम्, अल्पे बले हीनबल इति पद्धतिवचनात्॥ २॥

भाषा०—जिसके जन्म समय लग्नेश पापग्रह से युक्त होकर द्वादश १२, अष्टम ८, अथवा ६ षष्ठ भवन में हों तो उसको शरीर सुख नहीं होता है। इसी प्रकार द्वादशेश द्वादश भवन में, अष्टमेश अष्टम भवनमें, षष्ठेश षष्ठ भवनमें हो तो वही फल देते हैं अर्थात् उसे देह सुख नहीं होता है। एवं यदि पापग्रह लग्न में हो और लग्नेश अपने बल से हीन हो तो वह मनुष्य अनेक रोगों से संयुक्त होकर मानसिक चिन्ता में प्राप्त होता है॥ २॥

अथ शुभयोगानाह—

अङ्गाधीशः स्वगेहे बुधगुरुकविभिः संयुतः केन्द्रगो वा
स्वीये तुङ्गे स्वमित्रे यदि शुभभवने वीक्षितः सत्स्वरूपः
स्यान्नूनं पुण्यशीलः सकलजनमतः सर्वसम्पन्निधानं
ज्ञानी मन्त्री च भूपः सुरुचिरनयनो मानवो मानवानाम्॥३॥

अंगाधीशः लग्ने चेदित्येको योगः। बुधगुरुकविभिर्युक्तो लग्नेशः केन्द्रग इति द्वितीयः। स्वीये तुंगे स्वोच्चे "अजवृषभमृगांगनाकुलीराः

भषवणिजौ च दिवाकरादितुङ्गा' इत्याद्युक्तेः। स्वमित्रे स्वमित्र
अथवा शुभभवने शुभग्रहैः वीक्षितः लग्नेश इति तृतीयः। एषाम
तमयोगे जातो मानवः मानवानां मध्ये भूपादिकः स्यात्। भू
भूपालो, मंत्री अमात्यः, सर्वसंपन्निधानं सर्वासां सम्पदामाश्र
ज्ञानी भूपत्वाद्युपयुक्तः, ज्ञानवान्, सत्वरूपः सत्वगुणानुरू
अतश्च पुण्यशीलः सुवृत्ती, रुचिरनयनःसुंदरनयनादिशरीरः सक
जनमतः सर्वजनमान्यः, पुण्यशीलशब्देन सत्यार्जवादि द्योत्
तदुक्तं जातकरहस्ये-'यः सात्त्विकस्तस्य दयास्थिरत्वं सत्यार्ज
ब्राह्मणदेवभक्तिरिति ॥ ३ ॥

भाषा०—यदि लग्नेश लग्न में हो अथवा बुध, बृहस्पति, शुक्र
संयुक्त होकर केन्द्र में हो, अथवा अपनी उच्च में अपने मित्र के रा
में हो, यदि वा शुभग्रह के भवन में हो, वा शुभगृह से देखा जाता
तो वह मनुष्य निश्चय अति सुन्दर और सब मनुष्यों में मान्य,
प्रकार की सम्पत्ति से युक्त, ज्ञानी सुन्दर नेत्रवाला मनुष्यों में श्रे
मन्त्री अथवा राजा होता है ॥ ३ ॥

अथानिष्टयोगत्रयं श्लोकेनाह—

लग्ने क्रूरेऽथ याते खलखचरगृहं लग्ननाथे रवीन्दू
क्रूरान्तःस्थानसंस्थावथ दिनपनिशानाथयोर्द्यूनयायी।
भूमीपुत्रस्तु पृष्ठादुदयमधिगतश्चन्द्रजश्चेन्मनस्वी
स्यादन्धो दुष्टकर्मा परभवनरतः पूरुषः क्षीणकायः ॥ ४ ॥

क्रूरे लग्ने क्रूरग्रहराशौ लग्नेशः स्थितः अयं एको योगः
रवींदू पुष्पवन्तौ क्रूरयोर्ग्रहयोर्मध्यस्थौ क्रूरमध्यस्थौ, क्रूरमध्यस्थ
राश्यंशापेक्षया वा ज्ञेयम्। संकोचे प्रमाणाभावात् अयं द्वितीयो योगः
अथ दिनपनिशानाथयोः सूर्याचन्द्रमसोः द्यूनयायी सप्तमगः भौम
बुधः पृष्ठादुदयं अधिगतः पृष्ठोदयराशौ स्थित इति तृतीयो योगः

अत्र जातः पुरुषः मनस्वी प्रशस्तमना इत्यर्थः। अन्धः दुष्टकर्मा परभवनरतः परगृहवासरतः परस्त्रीरतो वा स्यात्। क्षीणकायः क्षीणशरीरश्च मनस्वित्वं। कालगतचन्द्रस्य बलत्वे बोध्यम्। एवं तनुभावस्य शुभाशुभयोगा उक्ताः। ननु क्वाचिच्छुभयोगेऽपि शुभफलं नोपलभ्यते तथा अशुभयोगेऽशुभफलमिति तत्र को विशेष इति चेत्सत्यं क्रूरग्रहदृष्टयुतत्वादियोगेन। अयं भावः शुभयोगकारकग्रहोपरि क्रूरदृष्टौ सत्यां विनिश्चयप्राप्तं फलं नोपलभ्यते, अशुभयोगकारकग्रहोपरि शुभदृष्ट्याऽशुभं नोपलभ्यते। ताजिककारैरित्थशालस्य दृष्टिप्रयुतमणऊयोगेन भञ्जनं कृतमुक्तम्। बृहज्जातककारेण-"न शुभा उदिता योगा याप्या भवन्ति शुभेक्षिता" इत्युक्तम्। इति तनुभावः ॥ ४ ॥

भाषा०—पापग्रह लग्न में और लग्नेश पापग्रह की राशि में हो, अथवा सूर्य और चन्द्रमा पापग्रहों के मध्य में हो, अथवा सूर्य से किंवा चन्द्रमा से मंगल सप्तम भवन में हो और बुध पृष्ठोदय राशि में हो तो इन तीनों योगमें पुरुष मनस्वी* अन्धा, कुकर्म करने वाला दूसरे के घर में रहने वाला और दुर्बल शरीरवाला होता है ॥ ४ ॥

अथ धनभावफलं श्लोकद्वयेन ब्रुवन् प्रथमं धनयोगचतुष्टयमाह—

कोशाधीशः स्वराशौ सुरगुरुसहितः सर्वसम्पत्प्रदः स्यात्
केन्द्रे वाथ त्रिके चेद्भवति हि मनुजः क्लेशभाग् द्रव्यहीनः।
स्वान्त्याधीशौ त्रिकस्थौ कवितनुपयुतौ स्यात्तदानेत्रहीन-
श्चन्द्रः पापेन युक्तो धनभवनगतः शुक्रयुङ् नेत्रहीनः ॥५॥

कोषाधीश इति। कोशाधीशो धनेशः गुरुयुतः स्वराशौ स्वे

*टि०—मनस्वीपद से मनमाने काम करनेवाला समझना। संस्कृत टीकाकारने—"प्रशस्तमनाः" अर्थ किया है। यह असङ्गत प्रतीत होता है। श्री सीताराम झा० ॥

२

भावे केंद्रे वा चेत्तदा जातस्य सर्वसम्पत्प्रदः स्यात्। अथानन्तरमन
योग उच्यत इत्यर्थः। गुरुयुतो धनाधीशः त्रिकेषु षष्ठाष्टमद्वादशे
अन्यतमे चेज्जातो मनुजः क्लेशभाक् द्रव्यहीनश्च स्यात्, सगु
धनाधीशः षष्ठे चेदयं योगः शिथिलो ज्ञेयः तं प्रति चाल्यधनयो
सद्भावात्। धनाधीशस्य शुभत्वे मध्यधनयोगसद्भावात्। तदुक्तं बृ
ज्जातके—"लग्नादतीववसुमान् वसुमान् शशांकात्सौम्यग्रहैरुपचयो
गतैः समस्तैः। द्वाभ्यां समोऽल्पवसुमांश्च तदूनतायामन्येष्वसत्स्व
फलेष्विदमुत्कटेन"॥ अथान्ययोगः स्वांत्याधीशौ द्वितीयद्वादशाधी
शुक्रलग्नेशयुक्तौ चेत्तदा जातः नेत्रहीनः अन्धः स्यात्। अथान्ययो
शुक्रपापाभ्यां युक्तश्चन्द्रो धनस्थश्चेत्तदा जातो नेत्रहीन इति ॥५॥

भाषा०—कोशाधीश (धन भाव का स्वामी) वृहस्पति से यु
होकर अपनी राशि में अथवा केन्द्र में हो तो जातक को सर्व सम्पत्ति
देता है। यदि वृहस्पति सहित त्रिक (६ । ८ । १२) स्थान में हो
मनुष्य दुःखभागी और धनहीन होता है। तथा द्वितीय और द्वाद
भाव के स्वामी शुक्र और लग्नेश से सहित होकर त्रिक स्था
(६।८।१२) में हो तो इस योग में जन्म लेनेवाला नेत्रहीन (अन्धा
होता है। एवं यदि चन्द्रमा पापग्रह और शुक्र से संयुक्त धनभवन
हो तो जातक नेत्रहीन होता है ॥ ५ ॥

अन्ययोगत्रयं तत्र द्वितीययोगस्य तातादिष्वतिदेशं चाह—

शुक्रः सेन्दुस्त्रिकस्थो जनुषि निशि नरः प्राप्नुयादन्धकत्वं
जन्मान्धःसार्कशुक्रस्तनुभवनपतिः स्यात्तदानीं मनुष्यः।
एवं तातानुजाम्बासुतनिजगृहिणीस्थाननाथाः स्थिताश्चे-
दादेश्यं तत्र तेषां प्रवरमतियुतैरन्धकत्वं तदानीम् ॥ ६ ॥

जनुषि जन्मसमये सेन्दुः सचन्द्रः शुक्रस्त्रिकस्थः षष्ठाष्टमद्वा
दशेषु अन्यतमे चेत्तदा जातो मनुजः निशि अन्धकत्वं प्राप्नुया

ार्कशुक्रः सूर्यशुक्रयुतः तनुभवनपतिः लग्नेशः त्रिकस्थ इत्यनुषङ्गः
दानीं जातो मनुजः जन्मांधः जन्मनैवांधः स्यादिति। तातादीनां
थाननाथाः एवं पूर्वोक्तप्रकारेण सार्केन्दुशुक्रास्त्रिकस्थाश्चेत्तदानीं
नां तातादीनां अन्धकत्वं प्रवरमतियुतैरादेश्यं वक्तव्यम्। तत्र तातः
पिता, अनुजः कनिष्ठभ्राता, अम्बा माता, निजगृहिणी भार्या,
वरमतिशब्देन तातादीनां जन्मन्यपि अन्धयोगज्ञानत्वं सूच्यते॥

भाषा०—जन्म समय यदि शुक्रसंयुक्त चन्द्रमा त्रिक (६।८।१२) स्थानमें से किसी स्थान में हो तो मनुष्य रात्र्यन्ध होता है। और यदि सूर्य, शुक्र के साथ लग्नेश त्रिक (६।८।१२) में हो तो वह मनुष्य जन्मान्ध होता है। इसी प्रकार यदि तात १०, भ्रातृ ३, जननी ४, सुत ५, गृहिणी ७, इन भावों में जिसका स्वामी सूर्य, चन्द्र, शुक्र से संयुक्त होकर त्रिक (६।८।१२) में पड़े तो तीक्ष्णबुद्धिवाले उसका अन्धकत्व समझे। अर्थात् तात भवनके स्वामी उपरोक्त योगयुक्त हो तो पिता अन्धा होता है। एवं भ्रातृ भावाधीश से भ्राता अन्धा होता है इत्यादि बुद्धिमान स्वयं विचारकरे॥६॥

अथ भ्रातृसम्भवतत्सुखादियोगानाह—

भ्रातृस्थानेशभौमौ व्ययरिपुनिधनस्थानगौ बन्धुहीनः
स्वक्षेत्रे सौम्यदृष्टे सहजभवनपे मानवः स्याच्च तद्वान्।
केन्द्रस्थे बन्धुसौख्यं शुभविहगयुते स्याददभ्रं नराणां
पापैश्चेदन्यथैतत्तदनु निजधिया ज्ञेयमित्थं समस्तम्॥७॥

भ्रातृस्थानेशभौमौ तृतीयाधिपतिभौमौ व्ययरिपुनिधनस्थानगौ (१२।६।८) त्रिकस्थौ यदि तदा जातः बन्धुहीनः सामान्यशब्दनिर्देशेन सहोदरबन्धवो विवक्षितास्तै रहित इत्यर्थः। सहजभवनपे सहजाधिपे स्वक्षेत्रे स्वगृहे सौम्यदृष्टे शुभग्रहदृष्टे सति मानवः तद्वान्बन्धुमान् स्यात्। सहजाधिपे शुभग्रहयुते केन्द्रस्थे अदभ्रं बहु बन्धुसौख्यं स्यात्। केंद्रस्थे सहजभवनपे पापग्रहैर्युते चेदन्यथा

बन्धुसौख्यं न स्यात्। युते दृष्टे इत्युपलक्षणम्। इत्थं असुना प्रका-रेण बुद्धिमद्भिर्निजधिया स्वबुद्ध्या समस्तं भावफलं तदनु योगवि-चारानन्तरं ज्ञेयम्, अयमर्थः योगे सत्यपि योगकर्तृषु भूयसी पापदृष्टिः पापयोगः योगकर्तृणां नीचास्ततो योगे प्रागुक्तं लक्षणं न स्यात् इति भावः ॥ ७ ॥

भाषा०—भ्रातृ (३) स्थान के स्वामी और मंगल दोनों यदि द्वादश, अष्टम, षष्ठ (१२ । ८ । ६) भवन में पड़े तो वह मनुष्य बन्धुहीन होता है। तथा सहज भवनेश यदि स्वक्षेत्र में हो, शुभग्रह से युक्त हो तो मनुष्य बन्धुयुक्त होता है। इस प्रकार यदि सहजेश केन्द्र में हो शुभग्रह से दृष्ट हो तो बन्धुओं का सुख सर्वदा होता है। यदि पापग्रह से देखा जाता हो तो अन्यथा समझे अर्थात् बन्धु का सुख नहीं होता है; इत्यादि अपनी बुद्धि से मतिमान् सब विचार करे ॥ ७ ॥

अथ चतुर्थभावफलं वदन् योगचतुष्टयमाह—

पातालेशः स्वराशौ शुभखचरयुतो भाग्यनाथेन युक्तः
सामन्तः स्यात्ततश्चेत्सुरपतिगुरुणा वाहनेशस्तनुस्थः ।
संदृष्टो राजपूज्यस्तदनु च हिबुकाधीश्वरो लाभसंस्थो
यानं पश्यन्नराणां निवहमभिमतं वाहनानां प्रदत्ते ॥ ८ ॥

पातालेशश्चतुर्थेशः स्वराशौ शुभखचरयुतः शुभग्रहयुक्तः स भाग्यपेन भाग्यस्वामिना युक्तश्चेज्जातः सामन्तः स्यात् मांडलिकः स्यात्। ततो योगानन्तरं लग्नस्थो वाहनेशो गुरुणा पूर्णदृष्टया दृष्टश्चेत्तदा जातो राजपूज्यः राजकृतसन्मानभाजनं स्यात्। तदनु गुरुदृष्टः सुखेशः लाभगश्चेत्, यद्वा गुरुदृष्टः सुखेशः यानं पश्यन् भवति तदा वाहनानां निवहं समूहं नराणां अभिमतं प्रदत्ते। इदं योगद्वयं वा शब्दप्रयोजकेऽपि ज्ञेयमन्ययोगलाभाच्चतुर्थदृष्टिविरहात् योगप्रभवप्रसंगात् ॥ ८ ॥

भाषा०—चतुर्थ भवन का स्वामी यदि शुभग्रह से और नवमेश से संयुक्त अपने स्थान में हो तो वह सामन्त (माण्डलिक) अर्थात् एक-(प्रान्त) जिला का राजा (कलेक्टर) होता है। तथा जिसके जन्मकाल में चतुर्थेश लग्नमें हो और बृहस्पति से देखा जाता हो तो वह राज्यपूज्य होता है। तथा यदि चतुर्थेश एकादश भाव में हो और बृहस्पति से दृष्ट हो अथवा किसी स्थान में रहकर चतुर्थ भाव को देखता हो तो मनुष्य को अभीष्ट-वाहनों का समूह देता है॥ ८॥

अथ गृहप्राप्त्यादियोगानाह—

स्वक्षेत्रे तुर्यनाथस्तनुपतिसहितः स्यादकस्माद्गृहाप्तिः
सौहार्दं वा सुहृद्भिस्तदितरगृहगश्चेद् गृहालभ्ययोगः।
यावन्तः पापखेटा धनदशमगृहप्रांत्यपैश्चेत्त्रिकस्था
युक्तास्तावत्प्रमाणा ज्वलनवशगताः क्लेशदाः स्युर्गृहा नुः॥९॥

लग्नेशसहितश्चतुर्थभावनाथः स्वक्षेत्रे चतुर्थभवने चेत्तदा जातस्य अकस्मादयत्नतो गृहाप्तिः गृहलाभः स्यात्। तथा सुहृद्भिर्हितकारकैः जनैः सौहार्दं प्रीतिः सुहृज्जनयुक्तं गृहादि स्यादित्यर्थः। तनुपतियुक्तः चतुर्थनाथः तदितरगृहगः चतुर्थभवनादन्यभवनस्थश्चेत्तदा गृहालभ्ययोगः गृहप्राप्त्यभावः। यावन्तः क्रूरग्रहाः द्वितीयदशमचतुर्थद्वादशनाथैः सहितास्त्रिकस्थाः तावन्तो गृहाः जातस्य नुः नरस्य वह्निवशगता दग्धाः अत एव क्लेशदाः स्युः। अत्र धनेशादीनां चतुर्णां समुदितानामेकयोगो न विवक्षितः। त्रिकभवने यो वा प्रांत्यसद्भावे सावकाशत्वात्॥ ९॥

भाषा०—चतुर्थेश यदि लग्नेश से युक्त होकर चतुर्थ भवन में हो तो उस मनुष्य को अकस्मात् (अनायास) घर की प्राप्ति होती है और सत्पुरुषों से मैत्री होती है। यदि चतुर्थ गृह में नहीं हो तो भवन की प्राप्ति नहीं होती है। और जितने पापग्रह द्वितीय, दशम, चतुर्थ, द्वादश

इन स्थानों के स्वामी से युक्त होकर त्रिक (६ । ८ । १२) स्थान हो उतने ही घर अग्निवश होकर के (जल करके) जातक को क्ले देते हैं ॥ ९ ॥

अथ वाहनविरामयोगौ तच्छांतिकरणं चाह—

यावन्तो वाहनस्थाः शुभविहगदृशां गोचरा नो भवेयु-
स्तावन्तो वा विरामाः परमगुणवतां वाहनानां नृणां स्युः
क्रूराः पश्यन्ति यानं व्ययनिधनगताश्चेत्तदा तद्वदेव
प्राज्ञैरादेश्यमेषां खलु शुभकरणं शान्तिकं वाहनानाम् ॥१०॥

क्रूरा इत्यनुषङ्गः, यावन्त वाहनस्थाः शुभविहगदृशां गोचरा नो भवेयुः शुभग्रहदृष्टा न स्युः तावन्तः नृणां परमगुणवतां प्रकृष्टगुणयुक्तानां वाहनानां विरामाः विनाशाः स्युः। अथ द्वादशाष्टमगताः क्रूराः यावन्त इत्यनुषङ्गश्चतुर्थं पश्यंति चेत्तदा पंडितैस्तद्वदेव दृष्टक्रूरग्रहे संख्याप्राये स्ववाहनानां विरामाः स्युरिति ज्ञेयम्। तत्र वाहनानां शुभकरणं शांतिकं प्राज्ञैः आदेश्यं विधेयमिति शेषः। इति चतुर्थभावः ॥ १० ॥

भाषा०—जिसके जन्म समय शुभग्रह की दृष्टि से रहित जितने पापग्रह वाहन (चतुर्थ) स्थान में हों उतने ही उसके उत्तम गुणयुक्त वाहनों का नाश होता है। इसी प्रकार द्वादश, अष्टम भवन में स्थित होकर जितने पापग्रह चतुर्थ स्थान को देखते हों उतने ही वाहनों का नाश होता है। इसलिये बुद्धिमान इन वाहनों की शुभप्रद शान्ति करै ॥ १० ॥

अथ पञ्चमभावफलं विवक्षुर्निरुपायेन विद्याबुद्धियोगानाह—

विद्यास्थानाधिपो वा बुधगुरुसहितश्चेत्त्रिके वर्तमानो
विद्याहीनो नरः स्यादथ नवमनिजक्षेत्रकेन्द्रेषु तद्वान्।

बालत्वं वृद्धता वा यदि गगनसदां जन्मकाले तदा स्यात्
प्रज्ञामान्द्यं नराणामथ यदि विहगःस्वर्क्षगो दोषहृत्स्यात्॥११॥

विद्यास्थानाधिपः पञ्चमेशः केवलो, बुधगुरुसहितो वा त्रिके वर्तमानश्चेत्तदा जातो विद्याहीनः। त्रिकस्थे पञ्चमेशे बुधगुरुयोगे विद्याद्यनुकूलो नास्तीति वा शब्देन द्योतितम्। अथ पञ्चमेशः पञ्चमनवमकेंद्रेषु स्थितश्चेत्तदा जातः विद्यावान्। बुधगुरुयोगे विद्यावत्त्वं किमुत वक्तव्यमिति गम्यते। अथ जन्मकाले प्रज्ञायोगकर्तॄणां गगनसदां ग्रहाणां बालत्वं वृद्धता वा यदि तदा जातानां प्रज्ञामांद्यं अल्पबुद्धिः स्यात्। यदि बालो वृद्धो वा ग्रहः स्वक्षेत्रग तदा दोषहृत् प्रज्ञामांद्यत्वप्रयोजकदोषं दूरीकुर्यादित्यर्थः॥ ११॥

भाषा०—अब पञ्चम भाव का फल कहते हैं—विद्या (पञ्चम) स्थान का स्वामी अकेला अथवा बुध, बृहस्पति से युक्त होकर त्रिक भवन (६।८।१२) में पड़े तो मनुष्य विद्याहीन होता है। यदि नवम पञ्चम वा केन्द्र में पड़े तो विद्यावान् होता है। यदि बुद्धि योग कारक ग्रह जन्म समय में बाल हो अथवा वृद्ध हो तो उस मनुष्य की मन्द बुद्धि होती है। यदि बाल वृद्ध होकर भी ग्रह स्वक्षेत्र में हो तो दोष का नाश करता है॥ ११॥

अथ मूकत्वसन्तानाभावयोगानाह—

वाक्स्थानेशो गुरुर्वा व्ययरिपुविलयस्थानगो वाग्विहीन-
श्चैवं पित्रादिकानां पतय इह युता मूकता स्याच्च ताभ्याम्।
वागीशात्पंचमेशस्त्रिकभवनगतः पुत्रधर्माङ्गनाथा
रन्ध्रद्वेष्यान्तिमस्था यदि जनुषि नृणामात्मजानामभावः१२

वाक्स्थानेशः पंचमेशो, गुरुर्वा व्ययरिपुविलयस्थानगस्त्रिकस्थश्चेत्तदा वाग्विहीनः मूकः स्यात्। अथ पित्रादिमूकतायोगमाह। एवं

प्रकारेण पित्रादिभावानां दशमभावादिराशीनां पतयस्ताभ्यां पंचमे-शगुरुभ्यां युताः त्रिके तिष्ठन्ति चेत्तदा तातादीनां मूकत्वं स्यात् आदिशब्दात् अनुजादयो ज्ञेयाः । अथ जन्मनि जीवात् जीवाधिष्ठितराशेः पंचमेशः त्रिकस्थः, पुत्रधर्मांगनाथाः पंचमनवमलग्नेशा जन्मलग्नात्त्रिकस्थाः यदि तदा पुत्राणामभावो वाच्यः ॥ १२ ॥

भाषा०—जिसके जन्म समय पञ्चमेश अथवा बृहस्पति यदि (६।८।१२) इन स्थानों में हों तो वह वाग् विहीन (मूक) होता है। इसी प्रकार पित्रादि (दशम आदि) स्थान का स्वामी यदि पञ्चमेश तथा बृहस्पति से युक्त त्रिक में हो तो उसका पिता आदि मूक (गूँगा) होता है, (यथा दशमेश यदि पञ्चमेश और गुरु से युक्त त्रिक में हो तो पिता गूंगा होता है, ऐसे स्त्री वन्धु''' इत्यादि की मूकता बुद्धिमान् विचार करै) एवं यदि बृहस्पति से पञ्चमेश त्रिक (६।८।१२) भवन में हो तथा पंचमेश, नवमेश, लग्नेश, यदि लग्न से (६।८।१२) इन भवनों में हो तो पुत्र का अभाव समझै ॥ १२ ॥

अथ सन्तानयोगमाह—

किञ्चित्कालं विलम्बः शुभखगसहितास्तेऽथ कर्के सुतर्क्षे
चंद्रे कन्याप्रजावान्प्रमिततनयवांश्चाथ देवेन्द्रपूज्यात् ।
क्रूरश्चेत्पञ्चमस्थो गुरुरपि सुतगः स्यात्तदापत्यहीन-
श्छायापुत्रः स्वगेहाद्यदिभवति सुते सूनुरेकस्तदानीम् ॥१३॥

ते पुत्रधर्मांगनाथाः शुभखगसहिताश्चेत्तदा सन्तानोत्पत्तौ किञ्चित्कालं विलंबः स्यात् । शुभग्रहदशांतर्दशाबलापेक्षया विलंब इति भावः । अथ कर्कराशौ पंचमभावे चंद्रश्चेत्तदा कन्याप्रजावान् अथवा प्रमिततनयवान् स्वल्पापत्यः स्यात् । अथ देवेंद्रपूज्यात् जीवात्पंचस्थः क्रूरश्चेत् जीवोऽपि लग्नात्पंचमगस्तदापत्यहीनः संतानरहितः स्यात् । यदि स्वगेहात्स्वराशितः पंचमे छायापुत्रः शनिश्चेत्तदा एकपुत्रः

स्यात् । अत्र संपूर्णदृष्ट्या शुभकृतस्य शनेः स्वराशेः पुत्रभवने दृष्टयानेकपुत्रयोगस्तदा रविभौमयोः स्वगृहात्पंचमस्थयोरेकपुत्रत्वं किमुत वक्तव्यमिति गूढोऽभिप्रायः ॥ १३ ॥

भाषा०—यदि पूर्वोक्त लग्नेश, पञ्चमेश, नवमेश, शुभग्रह से युक्त हो तो पुत्रोत्पत्ति में कुछ विलम्ब होता है। यदि पञ्चम भाव में कर्क राशि हो उसमें चन्द्रमा हो तो उसको बहुत कन्या होती हैं और अल्प पुत्र होता है। यदि बृहस्पति से पञ्चम स्थान में पापग्रह हो और बृहस्पति लग्न से पञ्चम स्थान में हो तथापि सन्तानरहित होता है। यदि शनैश्चर स्वभवन (मकर, कुम्भ) से पंचम स्थान में हो तो एक पुत्र होता है ॥ १३ ॥

(यहाँ शनैश्चर यदि अपने भवन से पंचम स्थान में होकर अनेक पुत्र देता है तो रवि और मंगल भी अपने भवन से पञ्चम में रह कर एक एक पुत्र देंगे यह गूढ़ अभिप्राय है।)

अथ अन्ययोगानाह—

कुम्भे चेत्पञ्च पुत्रास्तदनु च मकरे नन्दनेप्यात्मजाः स्यु-
स्तिस्रो भौमः सुतानां त्रितयमथ सुतादायको रौहिणेयः।
इत्थं काव्यः शशांको जनुषि च गुरुणा केवलेनैव पुत्राः
पञ्च स्युः केतुराह्वोः क्रियवृषभवने कर्कटे नो विलम्बः॥१४॥

नंदने पंचमभावे कुंभे छायासूनुरित्यनुषंगः यदि तदा पंच पुत्राः स्युः। मकरे आत्मजाः तिस्रः मकरस्य स्त्रीराशित्वादिति भावः। भौमे मकरे चेदित्यनुषंगः सुतानां त्रितयं त्रयं स्यात्। अथ रौहिणेयः बुधः पंचमे सुतादायकः कन्याप्रदः। इत्थं शुक्रश्चंद्रोऽपि पंचमे सुतादायकः। एवं केवलेन ग्रहयोगरहितेन पंचमस्थेन गुरुणा पंच पुत्राः स्युः। पंचमे मेष वृषे कर्के वा केतुराह्वोरेकतरे सति नो विलंबः

संतानोत्पत्तौ प्रतिबंधो न भवतीत्यर्थः। नो विलंब इत्यनेन सूचि
मकरकुंभातिरिक्तराशौ पंचमे शनौ मकरमंतरेण तत्रस्थे भौ
क्रियादिराशीन्विहाय पंचमे राहौ वा केतौ संततेर्विलंब एवे
भावः॥ १४॥

भाषा०—यदि जन्मसमय पञ्चम भवन में कुम्भराशि हो उस
शनैश्चर हो तो पाँच पुत्र होता है। यदि पञ्चम मकर में शनि हो
तीन कन्या होती है*। यदि मकर में मंगल होकर पञ्चम हो
तीन कन्या होती है, इसी प्रकार बुध, शुक्र, चन्द्रमा पञ्चम भवन
कन्यादायक होते हैं। केवल बृहस्पति पंचम भाव में हो तो पाँच
समझे ‡। यदि पंचम भाव में मेष, वृष अथवा कर्क हो तथा उसमें
अथवा केतु हो तो सन्तानोत्पत्ति में विलम्ब नहीं होता है †॥ १४।

ननु कति वर्षाणि विलंब इत्याह—

पापो वा वासवेज्यः सुखभवनगतः पञ्चमे वाष्टमे वा
शीतांशुः सन्ततेः स्यात्खगुणमितसमातुल्य एव प्रबन्धः।
यावन्तः पापखेटास्तनयगृहगताः सौम्यदृष्ट्या वियुक्ता-
स्तावद्वर्षप्रमाणो नियतमिह भवेत्सन्ततेर्वा विलम्बः॥१५

पापग्रहो जीवो वा चतुर्थस्थः, पंचमेऽष्टमे वा चन्द्रो भवति ता
खगुणमितसमातुल्यः त्रिंशद्वर्षमितप्रबंधः संततेरित्यनुषंगः प्रब
बंधः। शुभग्रहदृष्ट्या विमुक्ताः यावंतः पंचमस्थाः क्रूरग्रहाः स
"बलाधीनफलाः खगा" इत्युक्तप्रकारैः स्थानदिगादिबलरूपकैः
तदितिःध्येयं तावद्वर्षप्रमाणः संततेर्निश्चयेन विलम्बः स्यादित्यर्थः॥१

भाषा०—पापग्रह वा बृहस्पति सुख (चतुर्थ) भवन में हो अ
पञ्चम अथवा अष्टम भवन में चन्द्रमा हो तो तीस (३०) वर्ष पर्य

* टि०—मकर स्त्री राशि है इसलिये कन्यादायक हैं।

‡ यदि गुरु नीच में न हो तब। † अन्यथा बिलम्ब समझे।

सन्तति होने में बिलम्ब होता है तथा शुभग्रह की दृष्टि से रहित होकर जितने पापग्रह पञ्चम भवन में हों उतने ही वर्ष सन्तति होने में बिलम्ब होता है। बिलम्बमें वर्षका प्रमाण प्रथम गर्भाधान समयसे समझना चाहिये ॥ १५ ॥

अथ प्रतिबन्धकभञ्जकं सन्तानोपायमाह—

तत्प्राप्तिर्धर्ममूला तदनु बुधकवी शङ्करस्याभिषेका-
च्चन्द्रश्चेत्तद्वदेव त्रिदिवपतिगुरुर्मन्त्रयन्त्रौषधीनाम्।
सिद्ध्या मन्दारसूर्या यदि शिखितमसी तत्र वंशेशपूजा-
कार्याम्नायोक्तरीत्या बुधगुरुनवपाः क्षिप्रमेवात्र सिद्धिः॥१६

तत्प्राप्तिः संततिप्राप्तिः धर्ममूला श्रुतिस्मृतिविधिगतो धर्मः मूलं हेतुर्यस्याः सा तथा-आदित्यसप्तमीव्रतशंकराराधनसंतानगोपालमंत्रजपहरिवंशश्रवणादिविहितधर्ममूलेति भावः। अत्र विशेषः। तदनु तत्पश्चाद् बुधकवी विलंबप्रयोजकौ चेत् शंकरस्याभिषेकाद् रुद्राध्यायोक्तमंत्रकरणाभिषेकात्तत्प्राप्तिरित्यनुषंगः। चंद्रश्चेत्पूर्ववज्ज्ञेयम्। गुरुश्चेत्तथा यदा तदा मंत्रयंत्रौषधीनां सिद्ध्या सिद्धिशब्दो मंत्रादिभिः प्रत्येकं संबध्यते। मन्त्रसिद्ध्या यंत्रसिद्ध्या औषधीसिद्ध्येति। मंत्राचरणेन संतानगोपालमृत्युञ्जयादयो मन्त्रास्तदनुष्ठानेन, यंत्राणि यंत्रग्रन्थोक्तानि तेषां सिद्ध्या, ओषध्यो लक्ष्मणाद्यस्तासां सिद्धिः विधिवदनुष्ठानसाध्यफलेत्यर्थः। शनिभौमसूर्यराहूणां मध्ये कस्यचित्प्रतिबंधकत्वं तत्र वंशेशपूजा कुलदेवतापूजनम् आम्नायोक्तरीत्या कार्या। आम्नायशब्दोऽत्र वेदस्मृतिपुराणाद्युपलक्षणार्थः। तत्रापि विशेषः। बुधगुरुनवमस्थानपाः प्रतिबन्धकाश्चेदुमानुष्ठानात् क्षिप्रमेव सिद्धिः स्यादिति। इति पंचमभावः॥१६॥

भाषा०—अब सन्तान-प्राप्ति का उपाय कहते हैं—सन्तान की प्राप्ति में धर्म मूल (कारण) है। यदि बुध, शुक्र, और चन्द्रमा सन्तान में

विलम्ब करने वाले हों तो शङ्कर का अभिषेक (शतरुद्रीय आदि) द्वा करने से, यदि बृहस्पति विलम्ब कारक हो तो यन्त्र, तथा मन्त्र (सन्त गोपालादि मन्त्र) और आयुर्वेदोक्त औषधी के सेवन से, सन्त प्राप्ति होती है। यदि शनि, मंगल, सूर्य, केतु, राहु ये प्रतिबन्धक तो आम्नायोक्त (श्रुति-स्मृति-पुराणोक्त) रीति से कुलदेवता की करे, यहाँ भी यदि बुध, बृहस्पति और नवमेश विलम्बकारक हों सदनुष्ठान से शीघ्र ही कार्यसिद्धि होती हैं॥ १६ ॥

अथ रिपुभावफलं वक्तुकामस्तावद्व्रणरोगानाह—

षष्ठेशे पापयुक्ते तनुनिधनगते नुः शरीरे व्रणाः स्यु-
श्चादेश्यं तज्जनित्रीजनकसुतवधूबन्धुमित्रादिकानाम् ।
इत्थं तत्स्थानगामी शिरसि दिनमणिश्चानने शीतभानुः
कण्ठे भूमीतनूजो हृदि शशितनयो वाक्पतिर्नाभिमूले ॥१७

पापग्रहयुते षष्ठेशे लग्नाष्टमगते सति नुः मनुजस्य शरीरे व्रण स्युः । इत्थमुक्तप्रकारेण जनित्र्यादिभावानामीशे पापयुते तनुनिध गते तेषां व्रणाः स्युरित्यादेश्यं वक्तव्यम् । अंगविशेषव्रणानाह तत्स्थानगामी तनुनिधनगतः षष्ठेशो दिनमणिः सूर्यश्चेत् शिरा व्रणः, चन्द्रश्चेन्मुखे, भौमश्चेत्कंठे, बुधश्चेद्हृदये, वाक्पतिश्चेन्नाभि मूले व्रणाः स्युः ॥ १७ ॥

भाषा०—अब षष्ठ भाव का विचार कहते हैं—जिसके जन्म सम षष्ठेश पापग्रह से युक्त होकर लग्न अथवा अष्टम भवन में हो तो मनुष्य के शरीर में व्रण (घाव) होता है। इसी प्रकार जननी तात, सु बन्धु, मित्र, स्त्री, आदि भावों के स्वामी यदि लग्न अथवा अष्टम में तो जननी आदि को व्रण कहना। यदि षष्ठेश होकर उक्त स्थान में सू हो तो शिर में, चन्द्रमा हो तो मुख में, मंगल हो तो कंठ में, बुध तो हृदय में, बृहस्पति हो तो नाभिमूल में व्रण कहना॥ १७ ॥

नेत्रे पृष्ठे च शुक्रो दिनकरतनयः स्यात्पदे चाधरे चे-
त्केतुर्वा सैंहिकेयस्तदनु तनुपतिर्भौमवित्क्षेत्रसंस्थः।
आभ्यामालोकितःसन्भवतिहिकतिचित्स्थानगोवातदानीं
नेत्ररोगी नरःस्यात्प्रवरमतियुतैर्होरिकैर्ज्ञेयमेवम् ॥१८॥

शुक्रश्चेन्नेत्रमूले पृष्ठे च, शनिश्चेत्पदे चरणे, राहुः केतुर्वा अधरे व्रणाः स्युः इति पूर्वश्लोकेनान्वयः। अथ नेत्रव्याधियोगः-तदनु भौमबुधराशिस्थो लग्नेशः, भौमबुधदृष्टः कतिचित्स्थानगोऽपि वा, यत्र कुत्र वा स्यात्तदानीं जातः नेत्ररोगी स्यात्। प्रवरमतियुतैर्होरिकैरेवं ज्ञेयम्॥ १८॥

भाषा०—शुक्र षष्ठेश हो तो नेत्र और पीठ में, शनि हो तो पाँव में, केतु और राहु हो तो अधर (निचले ओठ) में व्रण कहें। यदि मंगल, और बुध की राशि (मेष, वृश्चिक, मिथुन, कन्या) में लग्नेश हो या लग्नेश किसी राशि में मंगल बुध से देखा जाता हो तो वह मनुष्य नेत्र रोगी होता है। इस प्रकार उत्तम बुद्धि वाले ज्यौतिषियों को समझना चाहिये॥ १८॥

अथान्ययोगाः—

षष्ठेशे लग्नयाते भवति हि मनुजो वैरिहन्ता धनस्थे
पुत्रात्तार्थोऽतिदुष्टः सहजभवनगे ग्रामदुःखाकरः स्यात्।
नाभिस्थाने च रोगी तनुनिधनपती शत्रुभावस्थितौ ना
नेत्रे वामेतरे स्यादसुरकुलगुरुः सूर्यजस्त्वङ्घ्रिरोगी ॥१९॥

षष्ठभावाधिपे लग्नस्थे जातः शत्रुहन्ता स्यात्। धनस्थे षष्ठेशे पुत्रात्तार्थः पुत्रेणात्तः गृहीतः अर्थो धनं यस्य सः पुत्रहृतधन इत्यर्थः, अतिदुष्टश्च स्यात्। सहजभवनगे ग्रामस्य दुःखकरः नाभौ रोगी च स्यात्। लग्नाष्टमपती षष्ठस्थौ ना पुरुषः नेत्ररोगी स्यात्। अत्र वामेः

तरशब्दोपादानादत्र वाम इति गम्यते। शुक्रः षष्ठेऽष्टमे इतरे दक्षिण नेत्रे रोगी। शनिः पृष्ठे चरणे रोगी स्यात् ॥ १९ ॥

भाषा०—जिसके जन्म समय षष्ठेश लग्न में हो वह मनुष्य श को मारने वाला होता है। यदि धन (२) भाव में हो तो उस धन पुत्र छीन लेता है और अति दुष्ट होता हैं। यदि षष्ठेश सहज (३ भाव में हो तो ग्रामजनों को दुःख देने वाला होता है और उसकी ना में रोग होता है। लग्नेश और अष्टमेश यदि षष्ठ भाव में हो तो वा नेत्र में रोगी होता है। लग्नाष्टमेश शुक्र यदि षष्ठ भाव में हो तो वामेत (दक्षिण) नेत्र में रोग होता हैं। शनि हो तो पाँव में रोग होता है ॥१९

अथान्ययोगाः—

दन्ते दन्तच्छदे वा कुमुदपतिरिपुः संस्थितः षष्ठभावे
केतुर्वा लग्ननाथः कुजबुधभवने संस्थितः क्वापि दृष्टः।
स्वेन प्रत्यर्थिना वा भवति जनुषि चेदासनार्धे सरोग-
स्तौ भूमीसूर्यपुत्रौ यदि रिपुगृहगौ तद्भवः स्याद्गदो नुः ॥२०॥

राहुकेतू शत्रुभावे चेद्दन्ते दन्तच्छदे ओष्ठे वा रोगी स्यात् भौमबुधराशिस्थितो लग्नेशः स्वेन प्रत्यर्थिना स्वशत्रुणा पूर्णदृष्ट यत्र कुत्रापि स्यात्तदा आसनार्द्धे गुदसमीपे वा रोगी स्यात्। यदि तौ भूमिसूर्यपुत्रौ रिपुगृहगौ षष्ठभावसंस्थौ चेत्तदा तद्भवः नुः पुरुषस्य गदो रोगः स्यात्। भूमिपुत्रे रुधिरविकारः, शनावितरःस्यादित्यर्थः॥२०

भाषा०—राहु अथवा केतु यदि षष्ठ भाव में हो तो दाँतों में व ओष्ठों में रोग होता है। यदि मंगल अथवा बुध की राशि (मेष वृश्चिक, मिथुन, कन्या) में लग्नेश किसी भाव में अपने शत्रुओं से देखा जाता हो तो आसनार्ध (गुदमार्ग) के समीप रोग होता है। यदि मंगल और शनि षष्ठ भाव में हो तो तद्भव रोग (अर्थात् मंगल से रुधिरविकार और शनि से वात विकार) होता है ॥ २० ॥

प्रालेयांशौ रिपुस्थे खलखगसहिते मानवो रोगवान् स्यात्
क्रूरैर्निष्पीडितश्चेत्तनुसदनगतः शीतरश्मिस्तदानीम् ।
क्रूरे केन्द्रालयस्थे यदि शुभविहगैर्नेक्षिते रोगवान् स्यात्-
तस्मिन् काव्यालयस्थे कुजगुरुकविभिर्नेक्षिते तद्वदेव ॥२१॥

तथा प्रालेयांशौ चंद्रे खलखगसहिते पापग्रहयुक्ते शत्रुभावस्थे सति रोगवान् स्यात्। क्रूरैर्निष्पीडिते शनिप्रभृतिभिः क्रूरग्रहैः योगेन दृष्ट्या वा पीडिते तनुसदनगते लग्नगे तस्मिन् शीतकरे चन्द्रे तद्वान् रोगी स्यात् । शुभग्रहदृष्टिरहितः केन्द्रगः क्रूरश्चेद्रोगवान् स्यात् । तस्मिन् क्रूरे शुक्रराशिसंस्थे कुजशुक्रगुरुभिर्न दृष्टे तद्वदेव रोगवानेव स्यात् । अत्र यद्यपि विशेषो नोक्तस्तथापि योगकर्तृगृहस्वामिकफवातपित्तादिकोपजन्यो विशेषरोगो ज्ञेयः ॥ २१ ॥

भाषा०—जिसके जन्म समय पाप ग्रहों के साथ चन्द्रमा षष्ठभाव में हो तो वह मनुष्य रोगी होता है। यदि वा पाप ग्रहों से पीड़ित चन्द्रमा लग्न में हो तो भी रोगी होता है। पाप ग्रह केन्द्र में हो शुभ ग्रह से नहीं देखा जाता हो तो भी जातक रोगी होता है। अथवा पाप ग्रह यदि शुक्र की राशि (वृष, तुला) में हो और मंगल, बृहस्पति, शुक्र इनसे न देखा जाता हो तो भी रोगवान् होता है ॥ २१ ॥

पुंल्लग्ने स्वीयतुङ्गे रिपुभवनपतौ वीक्षितेऽसन्नभोगै-
रङ्गे नूनं नराणामरिजनवशतः स्याद्गदो गूढरूपः
रिःफस्थाने स्थिते चेदरिसदनपतौ सिंहिकापुत्रयुक्ते
किंवा सप्ताश्वयुक्ते परगृहवसतिर्नीचवृत्तिर्नरः स्यात् ॥२२॥

षष्ठेशे पुंराशिलग्ने स्वोच्चे वा पापग्रहैर्दृष्टे सति नराणां जातानां अंगे शरीरे अरिजनवशतः शत्रुजनकारितः गूढरूपः प्रच्छन्नः गदो रोगः स्यात्, अत्र ग्रहतुंगराशीनां प्रायः स्त्रीराशित्वात् पुंल्लग्ने वा

शब्दप्रयोगे ज्ञायते। षष्ठेशो राहुयुक्तः यद्वा सूर्ययुक्तः द्वादशे स्थितः तदा जातो नरः परगृहवासी नीचवृत्तिश्च स्यात् ॥ २२ ॥

भाषा०—यदि षष्ठेश पुरुषराशि लग्न में अथवा अपनी उच्चराशि हो और पाप ग्रहों से देखा जाता हो तो उस मनुष्य के शरीर में श के द्वारा निश्चय गूढ़ रूप से रोग होता है। यदि षष्ठेश द्वादश स्थान राहु अथवा सूर्य से युक्त हो तो वह मनुष्य दूसरे के घर में रहनेवा और नीच कर्म करने वाला होता है ॥ २२ ॥

अथ सप्तमभावफलं निरूपयिष्यन् विवाहयोगानाह—

यावन्तो वा विहङ्गा मदनसदनगाश्चेन्निजाधीशदृष्टा-
स्तावन्तो नुर्विवाहास्त्वथ सुमतिमता ज्ञेयमित्थं कुटुम्बे।
कार्यो होरागमज्ञैरधिकबलवतां खेचराणां हि योगा-
दादेश्यं तत्रवीर्यं रविविधुकुभुवामंगदिक्शैलसंख्यम् ॥२३॥

यावन्तो ग्रहाः सप्तमस्थाः सप्तमेशेन दृष्टाः तावन्तो विवाहः पुरुषस्य ज्ञेयाः। सुमतिमता जन्मलग्नाभिज्ञेन दैवज्ञेन एवमुक्ता कारेण कुटुंबे जनकभ्रात्रादौ ज्ञेयम्। होरागमज्ञैर्जातकशास्त्रविद्भि धिकबलवतां ग्रहाणामेवं योगाद्विचारः कार्यः। तत्राधिकबलं रविवि धुकुभुवां सूर्यचन्द्रभौमानां अङ्गदिक्शैलसंख्यमादेश्यं, सूर्यस्य ष रूपाणि, चन्द्रस्य दशरूपाणि, भौमस्य सप्तरूपाणि अन्येषां प रूपाण्येव अङ्गरूपाधिको बलीति पद्धतिवचनात् ॥ २३ ॥

भाषा०—अब सप्तम भाव का फल कहते हैं—मनुष्य के जन्म सम जितने ग्रह सप्तम भाव में हों और सप्तमेश से देखे जाते हों उतने विवाह उसको कहे। इसी प्रकार बुद्धिमान उसके कुटुम्बों (भ्रा पिता आदिकों) के विवाह समझे। तथा होराशास्त्र के जानने वा अधिक बलवान् ग्रह के योग ही से फलका आदेश करे। वहाँ रवि बल ६, चन्द्रमा का १०, मंगल का ७, शेष ग्रहों का ६ है ॥ २३ ॥

न्द्रस्था वात्रिकोणे यदि खलुगृहिणीकारकाख्यानभोगाः
मार्थे शौनिजर्क्षे परिणयनविधिः स्यात्तदानीं नुरेकः ।
याधीशः कुटुम्बाधिपतिरपि युतश्चेत्त्रिके गर्हिताख्यै-
विद्भिः शुक्रयुक्तो नियतमिह भवेत्तावतीनां विरामः ॥

गृहिणीकारकाः सप्तमभावे शुभग्रहाः 'शुक्रेंदुजीवशशिजैः
कलैस्त्रिभिर्वा द्वाभ्यां कलत्रभवने च तथैककेन । एषां गृहेऽपि च
णेऽपि विलोकिते वा संति स्त्रियो मदनभावपतिस्वभावाः' । इति
ल्याणवर्मवचनात् एते केन्द्रस्थाः वा त्रिकोणे स्युः तथा सप्तम-
तीयपती स्वभवने स्यातां तदा जातस्य नुः पुरुषस्य परिणयन-
धिः विवाहः एकः स्यात् । सप्तमभावाधीशः द्वितीयाधिपो वा
क्रयुक्तः यावद्भिः क्रूरग्रहैर्दृष्टः सहितः त्रिके स्यात् तावतीनां
ीणां विरामो नाशः स्यात् ॥ २४ ॥

भावार्थ—स्त्रीकारक ग्रह (शुभ ग्रह) केन्द्र (१।४।७।१०) अथवा
कोण (५।९) में हो तथा सप्तमेश और धनेश अपनी राशि में
तो उस मनुष्य को एक विवाह हो। तथा सप्तमेश अथवा धनेश शुक्र
युत त्रिक (६ । ८ । १२) भवन में स्थित होकर जितने पापग्रहों
देखा जाता हो निश्चय उतनी ही स्त्रियों का नाश होता है ॥ २४ ॥

अथ गर्भाभावयोगानाह—

लग्नस्थे सप्तसप्तौ दिनमणितनये, कामगेऽथार्कमन्दौ
यूने चन्द्रे नभःस्थे न च यदि गुरुणालोकिते नो प्रसूते ।
रिष्येशे मित्रमन्दौ द्विपि सितकिरणेऽस्ते बुधेनेक्षिते नो
सूते द्रेष्ये जलर्क्षे यदि कुज-रविजौ गर्भिणी स्यान्न नारी २५

सप्तसप्तौ सूर्ये लग्नस्थे शनौ सप्तमे एको योगः । अथ सूर्य-

शनी सप्तमे गुरुदृष्टिरहितश्चन्द्रो दशमे इति द्वितीयो योगः । नारी नो प्रसूते । द्वेष्येशः शत्रुभवनस्वामी तथा मित्रमंदौ रवि च द्विषि षष्ठे बुधेन दृष्टः सितकिरणश्चन्द्रोऽस्ते सप्तमे अयं तृ योगः । अत्र नारी नो प्रसूते । कुजशनी षष्ठे चतुर्थे यदि तदा तस्य नारी गर्भिणी न स्यादिति चतुर्थो योगः । इति सप्तमभाव

भावार्थ—यदि सप्तपति (सूर्य) लग्न में हो तथा शनि भाव में हो (१) अथवा सूर्य तथा शनि सप्तम भाव में और द्शम भाव में बृहस्पति की दृष्टि से रहित हो (२) अथवा सूर्य और शनि ये तीनों षष्ठ भवन में हों और चन्द्रमा सप्तम भा बुध से देखा जाता हो (३) इन तीनों योग में से एक भी उसकी स्त्री को प्रसव न हो अर्थात् गर्भ हो भी सकता है परन्तु नहीं होता है । और यदि शनि, मंगल षष्ठ और चतुर्थ भवन में हो उसकी स्त्री गर्भवती भी नहीं होती है ॥ २५ ॥

अथाष्टमभावः, तत्र कष्टकर्मकरादियोगमाह—

रन्ध्रस्थानस्थिता वा स्थिरभवनगताः शुक्रवागीशसौम्
कृच्छ्राणां कर्मणां ना भवति हि नियतं कारकः स्तब्धभा
बाल्ये दुःखी नरः स्यान्निधनगृहपतौ लाभयाते सुखी स
पश्चात्पापेऽल्पमायुःशुभखगसहिते दीर्घमायुर्नराणाम् ॥

शुक्रगुरुबुधाः अष्टमस्थाः स्थिरराशिगता वा तदा जात पुरुषः नियतं नियमेन कष्टकर्मणां कर्ता स्यात् । स्तब्धभावः क चित्तश्च स्यात् । अष्टमभावेशे लाभगे बाल्ये बाल्यावस्थायां पश्चात्सुखी स्यात् । लाभगेऽष्टमेशे पापे अल्पायुः स्यात् । तस्मि शुभग्रहयुक्ते जातानां दीर्घमायुः स्यात् ॥ २६ ॥

भावार्थ—जिसके जन्म समय बुध, बृहस्पति और शुक्र

स्थान में अथवा स्थिर राशि में हो तो निश्चय वह मनुष्य कठोर कर्म करने वाला होता है और कठोर चित्त वाला होता है। तथा यदि अष्टम भाव का स्वामी लाभ (११) स्थान में हो तो वह मनुष्य बाल्यावस्था में दुःखी और अन्त में सुखी होता है। यदि एकादश स्थान में अष्टमेश पापग्रह हो तो अल्पायु होता है। वही (अष्टमेश) यदि शुभग्रह से युत हो तो मनुष्य दीर्घायु होता है ॥ २६ ॥

कुर्यादायुर्गृहेशः खलखगयुगरिप्रान्त्यसंस्थोऽल्पमायु-
श्चेल्लग्नाधीशयुक्तो निधनभवनपः स्वल्पमायुः प्रदत्ते ।
रन्ध्रस्थो वा चिरायुस्तदनु रविभवस्तत्र तद्वल्लयेशः
कोशस्थानस्थितश्चेज्जनुषि हि मनुजो वैरियुक् तस्करःस्यात्

आयुर्गृहेशः अष्टमपतिः क्रूरयुक्तः षष्ठद्वादशगतः तदाल्पमायुः कुर्यात्। अष्टमपतिः लग्नेश युक्तः अरिप्रान्त्यसंस्थः इत्यनुषंगः तदा स्वल्पमायुः प्रदत्ते। अष्टमेशः रंध्रस्थो वा चिरायुः प्रदत्ते। अष्टमेशः तदनु रविभवो वा तत्राष्टमे तद्वत् चिरायुः प्रदत्ते। लयेशः अष्टमेशः कोशस्थानस्थितः द्वितीये। स्थितश्चेत्तदा तस्करो वैरियुक्तश्च स्यात् ॥ २७ ॥

भावार्थ—यदि जन्म समय अष्टमेश पापग्रह से युत होकर षष्ठ अथवा द्वादश भवन में हो तो जातक को अल्पायु करता है। यदि अष्टमेश लग्नेश से युत होकर (६।१२) में हो तो भी अल्प आयु देता है। और अष्टमेश अष्टम भवन में हो तो दीर्घायु करता है अथवा शनि अष्टम भवन में हो तो वही फल (दीर्घायु) देता है। यदि अष्टमेश धन (२) भाव में हो तो वह मनुष्य शत्रु से युक्त और चोर होता है ॥२७॥

आयुर्देहाधिनाथौ निधनरिपुगतौ हीनवीर्यौ प्रसूतौ
संग्रामे कीर्तिशेषं व्रजति बलयुतौ तदा तज्जयास्मिन्

शुक्रेणान्दोलिकायास्तनुपविधियुतो वाहनस्थाननाथो
मूर्तौ दन्तावलेन्द्रै रथगुरुसहितः स्याज्जयो वाजिवाहैः

प्रसूतौ जन्मसमये आयुर्देहाधिनाथौ अष्टमलग्नपती हीनव
अष्टमषष्ठगतौ तदा संग्रामे कीर्तिशेषं प्राप्नोति संग्रामाभिमु
युद्धं विहाय पञ्चत्वं प्राप्नोतीत्यर्थः । तावेवायुर्देहाधिनाथौ सब
चेद्विजयी भवति । चतुर्थेशः शुक्रेण युतश्चेत् आन्दोलिका
शिबिकाया जयः शिबिकारूढो जयतीत्यर्थः । चतुर्थेशो लग्ने
चन्द्रेण च युतः मूर्तौ लग्ने स्थितश्चेत्तदा दन्तावलेन्द्रैः महागजैः
स्यात् । अथ चतुर्थेशो गुरुयुतः लग्ने चेत्तदा वाजिवाहैः वाजि
गजेन्द्रैश्च सह जयः स्यात् ॥ इत्यष्टमभावः ॥ २८ ॥

भावार्थ—जिसके जन्मकाल में अष्टमेश और लग्नेश बलहीन
अष्टम और षष्ठ भवन में हों तो वह मनुष्य रणभूमि में मारा
अपनी कीर्ति का शेष करता है (अर्थात् युद्ध विमुख होकर मारा
है)। यदि लग्नेश और अष्टमेश बली हों तो विजय पाता है।
चतुर्थेश, शुक्र से युत हो तो दोलिका (पालकी) पर बैठकर और
लग्नेश और चन्द्रमा से युक्त हों तो गजेन्द्र पर बैठकर, और
बृहस्पति संयुक्त हो तो घोड़ों पर बैठकर विजय पाता है ॥ २८ ॥

अथ नवमभावः तत्र शुभयोगमाह—

भाग्येशो मूर्तिवर्ती सुरपतिगुरुणालोकितो भूपवन्द्य
लग्नस्थो वाहनेशो नवमपतियुतौ पश्यतश्चेत्स्वगेहम्
सर्वासामास्पदं स्यान्मनुज इह तदा सम्पदां वाहनेन्
रन्ध्रस्थानस्थितश्चेद्व्रजति हि मनुजो भाग्यराहित्यमेवम्

नवमभावेशो गुरुदृष्टः लग्नस्थश्चेत्तत्र जातो राजवन्द्यः
मान्यः स्यात् । लग्नस्थो वाहनेशश्चतुर्थाधिपो नवमपतिश्च त

चतुर्थनवमपती स्वभवनं चतुर्थपतिश्चतुर्थं नवमपतिर्नवमं पूर्णदृष्ट्या पश्यतश्चेत्तदा सर्वासां धनधान्यसुवर्णादिसम्पदां आस्पदं आश्रयः मनुजः स्यात् वाहनेशः अष्टमस्थस्तदा मनुजः भाग्यराहित्यं व्रजति। होराविद्भिरेवं प्रकारेण भाग्यराहित्ये नुः हीनानां शुभलक्षणं शयोबलादिरहितानां वाहनानां प्राप्तिस्तदनु चपलता स्थिरता च ज्ञेयेत्यग्रिमेण सम्बन्धः ॥ २९ ॥

भावार्थ—जिसके जन्म समय नवमेश लग्न में हो और बृहस्पति से देखा जाता हो तो वह मनुष्य राजा लोगों से वन्द्य (प्रणाम करने के योग्य) होता है। चतुर्थेश और नवमेश दोनों लग्न में होकर अपने २ भवन को देखे तो वह मनुष्य सर्वसम्पत्तियों (धन-धान्य-सुवर्णादिकों) का आश्रय होता है। और यदि चतुर्थेश अष्टमस्थान में हो तो मनुष्य भाग्यरहित होता है * ॥ २९ ॥

हीनानां वाहनानां तदनु चपलताप्राप्तिरेवं नराणां
ज्ञेया होरागमज्ञैरथ नवमपतौ लाभगे राजवन्द्यः।
दीर्घायुर्धर्मशीलस्तदनु धनवपुर्वाहनेशाः स्वगेहे
धर्मेशो लग्नवर्ती जनुषि यदि गजस्वामिसिंहासनानाम् ॥

अथ नवमेशे लाभगे राजमान्यः दीर्घायुर्धर्मशीलश्च स्यात्। तदनु जनुषि धनवपुर्वाहनेशाः द्वितीयलग्नचतुर्थपतयः स्वगेहे लग्नेशो लग्ने धनेशो धने वाहनेशो वाहनभवने इत्यर्थः। धर्मेशो लग्नगतो यदि तदा गजस्वामिसिंहासनानां प्राप्तिरित्यनुषंगः। तत्र गजाः हस्तिनः, स्वामिसिंहासनानां राजाधिष्ठेयसिंहासनं राज्यकार्येषु भद्रासनं तेषां प्राप्तिः स्यात् ॥ ३० ॥

भावार्थ—और शुभ लक्षण-विहीन वाहनों की प्राप्ति होती है, और

* इसका सम्बन्ध आगे से है।

चञ्चलता होती है इस प्रकार होराशास्त्र जानने वाला समझे, और
नवमेश लाभ (११) भवन में हो तो वह मनुष्य राजमान्य (राज
आदि) होता है। और यदि धनेश धन भाव में, लग्नेश लग्न
वाहनेश चतुर्थ में, तथा धर्मेश लग्न में हों तो हाथी और राजसि
सनों की प्राप्ति होती है ॥ ३० ॥

योगानां स्यादमीषां प्रचुरबलयुतो योऽधिपस्तद्दशायां
लब्धिश्चान्तर्दशायामथ गुरुभृगुजौ वाहनाधीशयुक्तौ ।
केन्द्रेऽयाने त्रिकोणे त्वथ गुरुकवियुग्वाहनस्थानगो वा
भाग्याधीशः स्वराशौ भवति नरपतिर्वाहनव्यूहनाथः ॥

अमीषामुक्तवक्ष्यमाणानां योगानां योऽधिपः योगकर्ता
ग्रहः अधिकबलयुतस्तस्य दशायां अन्तर्दशायां लब्धिः योगफ
लाभः स्यात् । अथ गुरुशुक्रौ वाहनेशयुतौ सन्तौ केन्द्रे अथ
आगमे एकादशे इत्यर्थः, त्रिकोणे स्यातामित्येको योगः ।
गुरुशुक्रयुतो भाग्याधीशः भाग्ये चतुर्थे वा स्यात्तदायं द्विती
योगः । अत्र योगद्वये जातः वाहनव्यूहानां समुदायानां नाथः
नरपतिः स्यात् ॥ ३१ ॥

भावार्थ—इन उपरोक्त योगकारक ग्रहों में जो अति बलवान
उसी ग्रह की दशा और अन्तर्दशा में फल का लाभ होता है,
बृहस्पति, शुक्र दोनों चतुर्थेश से युक्त होकर केन्द्र अथवा एकादश
त्रिकोण में हो (१) अथवा नवमेश गुरु, शुक्र के सहित होकर च
या नवम स्थान में हो तो वह मनुष्य सैन्य समूह का स्वामी रा
होता है ॥ ३१ ॥

अथ चिंतायोगाः—

कर्मस्थे क्षेत्रचिन्ता त्रिकभवनगते सौख्यचिन्ता महीजे

वागीशे यानभूषावसनहयभवा चामरच्छत्रचिन्ता।
प्रालेयांशौ सिते स्यादथ मदनगते वाक्पतौ पुत्रचिन्ता
सन्तानस्थानयाते हिमकरतनये बुद्धिजाथ त्रिकोणे ॥३२॥

भौमे कर्मस्थे क्षेत्रचिन्ता कर्षणबीजवापक्षेत्रसंस्कारादिप्रकारक-
[क्षे]त्रचिन्ता इत्यर्थः। त्रिकभवनगते षष्ठाष्टमद्वादशे महीजे सौख्य-
[चि]न्ता सकलविषयप्रयुक्तसौख्यचिन्ता स्यादित्यर्थः। वागीशे त्रिकस्थे
[वा]हनभूषणवस्त्राश्वभवा चिन्ता स्यात्। चन्द्रे सिते वा त्रिकस्थे
[च]ामरच्छत्रचिन्ता तत्प्राप्तौ रक्षणे च चिन्ता स्यात्। अथ वाक्पतौ
[ग]ुरौ सप्तमस्थे पुत्रचिन्ता पुत्रविषयकगोरक्षणादिचिन्तेत्यर्थः। बुधे
[प]ञ्चमे बुद्धिजा चिन्ता। सूर्ये त्रिकोणस्थे पितुर्बान्धवस्य च चिन्ता।
[श]ुक्रे सुतनवमसप्तमगे यात्राचिन्ता। अथ गुरौ नवमपञ्चमे पुत्रजा
[मि]त्रभवा चिन्ता स्यात् चिन्तानाम येषां जनानां क्षेत्रादिसंभवस्तेषां
[त]द्विषयलाभालाभशुभानुकूल्यप्रातिकूल्यादिसंस्मृतिः, इति नवम-
[भ]ावः॥ ३२॥

भावार्थ—अब चिन्तायोग कहते हैं—मंगल दशम स्थान में हो तो
[उ]स मनुष्य को खेती की चिन्ता (जोतना, कोड़ना, बीज बोना
[इ]त्यादि) होती है। यदि त्रिक (६।८।१२) भवन में हो तो सब
[प्र]कार के सुख की चिन्ता, यदि त्रिक भवन में बृहस्पति हो तो वाहन,
[व]स्त्र भूषण अश्व (घोड़ा आदि) की, यदि चन्द्रमा अथवा शुक्र त्रिक
[भ]वन में हो तो चामर, छत्र आदिकी और बृहस्पति सप्तम भवन में हो
[त]ो पुत्र विषय की चिन्ता, यदि बुध पञ्चम स्थान में हो तो बुद्धि सम्ब-
[न्]धनी चिन्ता होती है *॥ ३२॥

* टि०—"त्रिकोणे" का इसके आगे से सम्बन्ध है।

अथ दशमफलमर्धेनाह—

मार्तण्डे तातबन्धोरथ सुतनवमद्यूनगे दानवेज्ये
यात्राचिन्ता नराणामथ नवमसुते पुत्रजा वासवेज्ये।
कर्माधीशो विवीर्यो यदि जनुषि तदा सर्वकर्मास्पदं
गेहे स्वीये यदासौ शुभविहगयुतो मानवो मानशीलः ॥

जनुषि कर्मभावेशो विवीर्यो निर्बलश्चेत्तदा जातः सर्वक
सर्वकर्मणामास्पदं स्थानं नो सर्वकर्मसाधको न स्यात्। अ
जनुषि कर्माधीशो बली चेत्सर्वाणि कर्माणि साधयेज्जात इत्य
यदा शुभग्रहयुतो दशमाधीशः स्वीयगेहे दशमे चेत्तदा जातो म
मानशीलो मानी भवेत् ॥ ३२ ॥

भावार्थ—सूर्य यदि त्रिकोण (९।५) में हो तो पिता और ब
की, यदि शुक्र (५।९।७) इन स्थानों में हो तो यात्रा की, यदि
स्पति (९ । ५) में हो तो पुत्रोत्पत्ति की चिन्ता (लाभ होगा
होगा......इत्यादि) होती है।

अब दशमभाव का फल कहते हैं—जिसके जन्म समय क
(दशमेश) निर्बल हो तो सब कामों का साधन नहीं होता है
यदि कर्मेश अपने भवन में हो तथा शुभग्रह से युक्त हो तो वह म
मानी होता है ॥ ३२ ॥

अथ दीर्घमध्यायुर्योगानाह—

लाभे केन्द्रे त्रिकोणे तनुनिधननभःस्थानपाः संस्थि
श्चेद्दीर्घायुःपापखेटाःपणफरहिबुकत्रिस्थिता मध्यमा
हीनायुः प्रोक्तमेते यदि जनुषि नृणां स्युस्तदापोक्लिम
रन्ध्रस्थानस्थितानां तनुपतिगगनस्वामिसूर्यात्मजाना

यदा नृणां जन्मसमये लग्नाष्टमदशमेशाः लाभे केंद्रे त्रिकोणे च स्थिताश्चेद्दीर्घायुः स्यात् । पापग्रहाः पणफरचतुर्थतृतीयस्थिताः मध्यमायुः स्यात् । एते पूर्वोक्ता आपोक्लिमस्थाश्चेदल्पायुः स्यात् । द्वात्रिंशद्वर्षादर्वाक् हीनायुः ततो मध्यायुः । चतुःषष्ठ्यनन्तरं दीर्घायुर्ज्ञेयम् । लग्नेशदशमेशशनीनां अष्टमस्थानस्थितानां मध्ये यो हीनः हीनबलस्तस्य दशापर्यन्तमायुः स्यादित्युत्तरेण सम्बन्धः ॥ ३४ ॥

भावार्थ—जन्म समय में यदि लग्नेश, अष्टमेश, दशमेश—ये लाभ (११) केन्द्र (१।४।७।१०) और त्रिकोण (९।५) में हो तो उस मनुष्य की दीर्घायु होती है । यदि पापग्रह पणफर (२।५।८।११) हिबुक (४) और तृतीय भवन में हो तो मध्यमायु; और यदि पूर्वोक्त ग्रह आपोक्लिम (३।६।९।१२) स्थान में हो तो अल्पायु होती है *। और अष्टम स्थान में स्थित लग्नेश दशमेश और शनि इन तीनों में × ॥ ३४ ॥

यो हीनस्तद्दशायुस्त्वथ निजभवने धर्मकर्मात्मजेशा-
श्चेत्स्युस्तेषां दशायां बहुलबलवशाद्धर्मबुद्धिर्नराणाम् ।
हानिः स्यादन्यथारौ तनुनिधनपती भानुपुत्रेण युक्तौ
स्यातां स्वर्भानुना चेत्तदनु च शिखिना तद्दशायां व्रणाः स्युः॥

अथ धर्मकर्मात्मजेशाः नवमदशमपञ्चमेशाः स्वभवने नवमादिके स्युस्तदा तेषां योऽधिकबलस्तस्य दशायां जातस्य धर्मबुद्धिः स्यात् । अन्यथा परभवने यदा तेषां योऽधिकबलस्तद्दशायां धर्महानिः स्यादित्यर्थः । लग्नाष्टमपती यदि शनिराहुकेतूनामन्यतमेन

* ३२ वर्ष पर्यन्त अल्पायु, अनन्तर ६४ वर्ष पर्यन्त मध्यमायु, ६४ के बाद दीर्घ आयु है ।

× आगे के श्लोक से सम्बन्ध है, इसलिये आगे का श्लोक देखो ।

युतौ षष्ठस्थौ तद्दशायां तनुनिधनपत्योरधिकबलस्य दशा[illegible]
व्रणाः स्युः ॥३५॥

भावार्थ—जो ग्रह बलहीन हो उसीकी दशा पर्यन्त आयु कह[illegible]
और यदि धर्मेश, कर्मेश, तथा पञ्चमेश—ये अपने २ भवन में हों [illegible]
इन में जो बलवान् हो उसकी दशा में मनुष्यों को धर्मकार्य की वृ[illegible]
होती है। इससे अन्यथा अर्थात् दूसरे के घर में हो तो इन में जो ब[illegible]
हो उसकी दशा में धर्महानि होती है, और यदि लग्नेश और अष्टमे[illegible]
—ये दोनों शनि, अथवा राहु, केतु से युक्त होकर षष्ठ भवन में हों [illegible]
जो बलवान् हो उसकी दशा में व्रण (फोड़ा आदि) होता है ॥ ३५ [illegible]

यानेशस्तत्र संस्थो यदि भवति तदा यानहेतुर्मृतिः स्या[illegible]
चौराच्छस्त्रेण चिन्ता नवमभवनतो भाग्यजाता विधेया[illegible]
व्योम्नो भूपालभूषावसनहयमहत्कर्मणा प्राप्तिचिन्ता [illegible]
लाभस्थानेऽखिलानां व्ययनिधनगृहात्कल्मषाणां विधेय[illegible]

चतुर्थेशस्तत्र षष्ठभावे चेत्तदा यानहेतुर्मृतिः स्यात्। चौराच्[illegible]
स्त्रेण च मृतिः। तत्रेति अरिभावपरामर्शेन यानेशस्य शन्यादि[illegible]
गे वक्ष्यते। अयमर्थः शनियोगे यानहेतोर्मृतिः, राहुयोगे चौरान्मृ[illegible]
केतुयोगे शस्त्रेण मृतिः। अथ संक्षेपादुक्तानां नवमादिभावा[illegible]
सामान्यचिन्तालम्बनमुच्यते। नवमभावतो भाग्यजाता चि[illegible]
विधेया। अयं भावः भाग्ये यो ग्रहः, भाग्येशो यो ग्रहः, भाग्यभ[illegible]
नस्थो यो राशिस्तद्द्वारा केंद्रग्रहात् भाग्यभवने शुभाशुभवर्गविवेक[illegible]
भाग्यभाग्येशबलाबलत्वमित्यादि विचार्य जातकशास्त्रविचारं परिभ[illegible]
बुद्ध्या फलं वक्तव्यम्। तथाभिहितं कल्याणवर्मणा—'भाग्यर्क्षप[illegible]
कस्मिन्को वा भाग्यर्क्षमाश्रितो विहगः॥ बलवान्मध्यबलो [illegible]
इत्यादि'। तत्रान्यत्र—'भाग्ये बलिष्ठे यदि मेषराशौ चतुष्पदो[illegible]
प्रकरोति धर्मम्। वृषे बलिष्ठे बहुधेनुदायी युग्मे तथा ब्राह्मणभो[illegible]

ता ।। स्यात् कर्कटे तीर्थपरश्च सिंहे जातो मनुष्यः परधर्मनिष्ठः ।
द्दृष्टिधर्मा मनुजो युवत्यां प्रसिद्धधर्मा तुलजो मनुष्यः' ।।३६।।

भावार्थ—यदि चतुर्थेश शनि के साथ षष्ठ भवन में हो तो वाहन
गिरने से मृत्यु होती है। यदि राहु से युक्त होकर रिपु भाव में हो
चोट से, यदि केतु से युक्त होकर षष्ठ भवन में हो तो शस्त्र से
त्यु होती है। (अब संक्षेप से नवमादि भावों का विचार कहते हैं)
वम भाव से भाग्य की चिन्ता, और दशम भाव से राज्य, भूषण, वस्त्र,
ड़ा, और द्वादश तथा अष्टम स्थान से पाप कर्म को चिन्ता (विचार)
रनी चाहिये ॥ ३६ ॥

ग्नस्थे रिःफनाथे भवति सुवचनो मानवो रूपवान्वा
वर्त्ते कार्पण्यबुद्धिर्बहुतरपशुमान् ग्रामयुक्तः सदा स्यात् ।
र्मे तीर्थावलोकी बहुलवृषमतिः क्रूरयुक्ते च पापी
मिथ्याकोशान्तकृत्स्यान्नियतमिदमितिज्ञेयमेवंसुधीभिः ।।३७।।

द्वादशभावाधिपे लग्नस्थे सति मानवः सुवचनः सुवाङ् मा-
र्गो रूपवान्भवति । तथा स्वर्त्ते स्वगृहे सति कृपणबुद्धिः, अनेक-
गुयुक्तो, ग्रामयुक्तश्च ग्रामाधिकारयुक्तश्च स्यात् । तथा धर्मे नवमे
ति तीर्थावलोकी तीर्थयात्रावान्, बहुलवृषमतिः अत्यन्तधर्मबुद्धिश्च
ात् । तथा पापग्रहयुक्ते सति पापी मिथ्याकोशान्तकृत् वृथा सञ्चि-
द्रव्यनाशकृत्स्यात् । अस्माद्योगान्नियतं फलं ज्ञेयम् ।। ३७ ।।

भावार्थ—अब द्वादश भाव का फल कहते हैं-जन्म समय यदि
दशेश लग्न में हो तो वह मनुष्य मधुर वचन बोलने वाला और
दर रूप वाला होता है। यदि स्वभवन में हो तो कृपण बुद्धि सहित
बहुत पशुओं को पालने वाला और गाँव का स्वामी (अधिकारी)
ा है। यदि धर्म (९) भाव में हो तो तीर्थों का अवलोकन करने

वाला और धर्म में बुद्धि रखने वाला होता है, यदि पापग्रह से युत
तो पापी और संचित धन को व्यर्थ नाश करने वाला होता है।
वान् इसको निश्चय समझे ॥ ३७ ॥

हृद्यैः पद्यैर्गुम्फिते सूरितोषे
ऽलङ्काराख्ये जातके मञ्जुलेऽस्मिन्।
भावाध्यायः श्रीगणेशेन वर्यै-
र्वृत्तैर्युक्तः शैलरामैः प्रणीतः ॥३८॥

इति जातकालंकारे द्वितीयोऽध्यायः ॥२॥

प्रसिद्धधर्मे निरतोऽष्टमे भवश्चापे तु शास्त्रे विहगः स्वधर्मा ।
मृगे विरज्येत् सुधर्मतो ना कुंभे तु पापादिभवो हि धर्मः ॥१॥
मीने बलिष्ठे शुभभावजातो तडागवापी भवधर्मनिष्ठः ॥
भाग्येशे लग्नगे भूपकरंकारो धने धनम् ।
बन्धुप्रियो भ्रातृभावे चतुर्थे पितृभक्तिमान् ॥ २ ॥
कृती तु पञ्चमे षष्ठे जातो विकलकारकः ।
सप्तमे सुभगस्त्रीमान् षण्ढः पापाष्टमे स्थिते ॥ ३ ॥
स्वभे दाता देवभक्तो दशमे नृपकार्यकृत् ।
लाभे दीर्घायुरखिलो व्यये देशान्तरस्थितिः ॥ ४ ॥
स्वस्वामिदृष्टियुक्तश्चेत्स्वदेशफलदायकः ॥ ५ ॥
मुनिभिरुक्तम् – होरागमश्च बलवान्येषां ते श्रेष्ठमानवाः ।'
होरासारे—"भाग्ये खलाः स्वगृहगाः शुभदृष्टियुता यदि ।
सौभाग्यसौख्ययुक्तस्य जन्म विन्द्याच्च भूपतेः ॥ १ ॥
क्रूरा नीचारिभांशस्था भाग्येशेन च वीक्षिताः ।
सर्वदा भाग्यहीनस्य जन्म विद्यान्न संशयः ॥ २ ॥
लग्नगे भान्तरे राशौ महाभाग्यो हि भाग्यतः ।

केन मध्यभागः स्यादभावे हीनभाग्यवान् ॥ ३ ॥
र्गजातके—"हन्ति पुण्यं च भाग्यं च कर्म पुण्यगतो नृणाम् ।
गे स्वर्क्षे सहस्रांशुः पुष्कलं धर्ममादिशेत् ॥ ४ ॥
ग्यभाग्यं भवेद्धन्यः पितृपक्षपरायणः ।
र्मे पूर्णौ निशानाथः क्षीणः सर्वविनाशकृत् ॥ ५ ॥
जे रक्तपदानन्दी भवेत्पशुपतिव्रती ।
ाग्यहीनश्च सततं नरः पुण्यगृहं गते ॥ ६ ॥
न्दभाग्यो बुधे पापे शुभे सौम्ये तु धार्मिकः ।
हाभाग्यः शुभे जीवे तथा शुक्रे बलीयसि ॥ ७ ॥
्डप्रदो वक्रगतो नवमस्थे शनैश्चरे ।
र्ब्होच्चगे शनौ भाग्ये राजा भवति धार्मिकः ॥ ८ ॥
हौ धर्मगते जातः सत्यशौचविवर्जितः ॥ ९ ॥
न्यत्र—भाग्याधिपश्चेद्यदि केन्द्रवर्ती आदौ वयस्येव सुखी मनुष्यः ।
त्रकोणगः स्वोच्चगतोऽथवा स्यान्मध्ये वयस्यल्पफलप्रदः स्यात् ॥१॥
ाग्यस्य नाथे स्वगृहेऽथ मित्रगृहेऽथवा स्यात्स्वनवत्रिभागे ।
ाग्योदयं तस्य वदन्ति तज्ज्ञाः शुभग्रहेन्द्रैश्च युते क्षिते च ॥ २ ॥
ीचस्थो वा शत्रुगेहस्थितो वा भाग्यस्वामी रिःफरन्ध्रारिगो वा ।
ापैः खेटः संयुतो वाऽथ दृष्टो भाग्यैर्हीनः स्याद्दरिद्रो सदैव ॥ ३ ॥
वमभावपती रिपुरन्ध्रगो नवमभं रिपुदृष्टयुतं तथा ।
दि तदा न च धर्मरतो नरः शुभखगैरथ धर्मरतो नरः ॥ ४ ॥
बलेऽपि शुभे खेटे भाग्यस्थे धार्मिको नरः ।
भवर्गयुते भाग्ये शुभकर्मा यथान्यथा ॥ ५ ॥

इत्यादिचिन्ता विधेया, तत्राह जातकसारावलीकारः—

ोरेंद्वोर्बलयोगाद्यो दशमस्तत्स्वभावजं कर्म ।
स्याधिपतेश्च तथा वृद्धिर्ज्ञेया तथा हानिः ॥ १ ॥
ामे नक्षत्रपतिर्लग्नात्पुरुषस्य यस्य सम्भवति ।

सर्वारम्भो भवति हि विनिर्दिशेत्तस्य जातस्य ॥ २ ॥
जातकसारे—'स्वस्थे खगे खलयुते खलजे नवांशे
स्वोच्चर्क्षगे स्वभवने सुखवृत्तयः स्युः ।
नीचारिभावगृहगेऽल्पसुखाल्पपुण्यो
दासोपचारभृतकानुचराश्च दासीः ॥ ३ ॥
धर्मभावे शुभक्षेत्रे शुभदृष्टे सुकर्मकृत् ॥
पापे क्षिते पापकर्मा स्वामिदृष्टे तु मध्यमः ॥ ४ ॥
वैद्याः पुरोहिताः शास्त्रस्मृतिज्ञा वञ्चका नराः ।
जायन्ते कर्मगैः पापैः सौम्यग्रहनिरीक्षितैः' ॥ ५ ॥
वराहः—'अर्थाप्तिः पितृपितृपत्नि शत्रुमित्र—
भ्रातृस्त्रीभृतकजनाद्दिवाकराद्यैः ।
होरेन्द्वोर्दशमगतैर्विकल्पनीया
भेन्द्वर्कास्पदपतिगांशनाथवृत्त्या ॥ १ ॥

अर्कांशे तृणकनकोर्णभेषजाद्यैश्चन्द्रांशे कृषिजलजांगनाश्रयाच्च
धात्वग्निप्रहरणसाहसैःकुजांशे सौम्यांशे लिपिगणितादिकाव्यशि
जीवांशे द्विजविबुधाकरादिधर्मैःकाव्यांशे मणिरजतादिगोमहि
सौरांशे श्रमवधभारनीचशिल्पैः कर्मेशाध्युषितनवांशकर्मसिद्धिः
मित्रारिस्वगृहगतैस्ततस्ततोर्थान्तुङ्गस्थे बलिनि च भास्करे स्ववी
राज्याधीशे केन्द्रगे सौम्यदृष्टे पापे केंद्रे सुप्रतापाभिधानः ।
जातो नित्यं भूमिपैः सेवनीयो भाग्यैर्युक्तः सुप्रतापप्रसिद्धः।'इ

अथ लाभस्थाने अखिलानां वस्तूनां प्राप्तिचिन्ता वि
तत्र होराप्रदीपे—

स्वस्वामिसद्ग्रहयुते क्षित आयवर्गैः सद्धर्मको भवति वस्तु
लाभः । क्रूरे च दृष्टिसहिते न च तत्र लाभस्तद्वर्गकेप्यथ च मि
विधत्ते ॥ १ ॥ लाभे रवीक्षितयुते रविवर्गयुक्ते चौराच्चतुष्पद

भवेत्प्रतापः । तद्वृद्धिधौ युवतितोयजनादिजातो भौमे सुवर्णमणि-
पावकशास्त्रजातः ॥ २ ॥ सौम्ये चिते ज्ञगण आयगृहे धनं स्याच्छि-
ल्पादिकाव्यलिपिभिस्तुरगैः सशांरश्वैः । जीवेचिताय गुरुवर्गयुताय गेहे
यज्ञादिहेमहयनागरथादिमुख्यैः ॥ ३ ॥ शुक्रे चिताय शनिवर्गयुते
महिष्यः लोहादिकृष्यवनकार्यभवा विवृद्धिः । नीचारिभार्कखगो-
क्तफलं न दद्याद्भीतिग्रहोद्भवबले बलिनस्तु वाच्यम् ॥ ४ ॥ इति ।
व्ययगृहान्निधनगृहाच्च मलिनकर्मणां चिन्ता विधेया । गर्गजातके—
'क्षीणेऽब्जे वा रवौ रिःफे धनं पुंसामथाहरेत् । बहुधार्थक्षयो भौमे
हृदृष्टेऽन्येषु सिद्धयः ॥ ॥ नृपीडा न च सन्तप्तं परिवादेन पीडितः ।
नृशंसं पुरुषं चान्द्रिः कुरुते व्ययराशिगः ॥२॥ उच्छ्रितव्ययकारी च
व्ययगे देवतागुरौ । श्रद्धाहीनो घृणाहीनो व्ययगे भार्गवे नरः ॥३॥
व्ययस्थानगते मन्दे क्रूरेषु कुरुते रुचिम् । व्यये राहौ नीचकर्मा
कपटी कुलदूषकः ॥ ४ ॥ व्यये भावे स्वामियुक्ते शुभदृष्टे च
सत्यपि । कीर्तिमान् जायते मर्त्यो विपरीते विपर्ययः ॥ ३७ ॥
सुधीभिरिदं नियतं नियमेन ज्ञेयं अध्यायं समापयति । शालिनी
वृत्तेनाह ॥ श्रीगणेशेन भावाध्यायः शैलरामैर्वृत्तैः सप्तत्रिंशद्भिः
श्लोकैरुक्तः ॥ ३८ ॥

इति श्रीजातकालंकारटीकायां भावफलाध्यायो

द्वितीयः ॥ २ ॥

भावार्थ—श्रीगणेश दैवज्ञ ने मनोहर पद्यों से युक्त, पण्डितों को
प्रिय करने वाले इस सुन्दर जातकालंकार में ३० उत्तम छन्द सहित
भावाध्याय को बनाया ॥ ३८ ॥

इति ज्यो० आ० श्रीसीतारामशर्मकृतायां जातकालंकारभाषा-
टीकायां द्वितीयोऽध्यायः ॥ २ ॥

अथ योगाध्यायः ।

तत्र तावत् शुभाशुभयोगान् व्यवस्य योगान्तरं वक्तु प्रतिजा
शिखरिणीवृत्तेन—

ग्रहाधीना योगाः सदसदभिधाना जनिमतां
ततो योगाधीनं फलमिति पुराणैः समुदितम् ।
अतो वक्ष्ये योगान् सकलगणकानन्दजनकान्
शुकास्यादुद्भूतं मतमिह विलोक्येह रुचिरम् ॥ १॥

पुराणैर्वसिष्ठशुकपराशरप्रभृतिभिः प्रोक्तं फलं योगाधीनं,
सकलगणकानन्दजनकान् अशेषज्योतिर्विदां प्रीत्युत्पादकान् यो
न्वक्ष्ये । किं कृत्वा शुकास्यात् शुकमुनिमुखादुद्भूतं रुचिरं शो
मतं विलोक्य आलोच्य ॥ १

अब योगाध्याय कहते हैं—

भावार्थ—मनुष्यों का शुभाशुभ योग ग्रहों के अधीन है ; ग्र
वसिष्ठ, शुक, पराशरादि प्राचीनाचार्योक्त शुभाशुभ फल योगों के आ
है ; इसलिये शुकदेव जी के मुख कमल से उत्पन्न सुन्दर मत को दे
कर समस्त गणकों को आनन्द देने वाले योगों को कहता हूँ ॥ १॥

अथानिष्टयोगानाह—

ऋक्षेशः क्षीणवीर्यः सुतनवमगतो मानवो मन्युमान्वै
राशीशे साङ्गनाथे रिपुनिधनगृहे प्रान्त्यगे दुर्बलः स्या
धर्मद्वेष्याष्टनाथाः खलखचरयुताः स्थानके क्वापि संस्
स्तैर्दृष्टाः स्यात्तदानीं परपुरुषरता सुन्दरी तस्य पुंसः

ऋक्षेशः जन्मराशिनाथः क्षीणबलः सन् त्रिकोणगतश्चेन्म
जातः मन्युमान् क्रोधी स्यात् । जन्मराशीशे साङ्गनाथे तनुपति
त्रिकस्थे दुर्बलः स्यात् । यस्य नवमषष्ठाष्टमेशाः क्रूरग्रहदृष्टियु

त्र कुत्रापि स्थिता यदि तदानीं तस्य भार्या जारगामिनी स्यात् ॥२॥

भावार्थ—यदि जन्मराशि का स्वामी बलहीन होकर पञ्चम अथवा वम स्थान में हो तो मनुष्य क्रोधी होता है। यदि जन्म राशि का वामी लग्नेश सहित त्रिक (६ । ८ । १२) इन स्थानों में से किसी थानों में हो तो दुर्बल होता है। यदि नवमेश, षष्ठेश और अष्टमेश पग्रह से युक्त होकर किसी स्थान में स्थित हो और पापग्रह से देखे ाते हों तो उस पुरुष की स्त्री पर-पुरुष-गामिनी होती है ॥ २ ॥

ातृस्थाने स्थितौ चेत्कुजविधुसहितौ षष्ठरन्ध्राधिनाथौ
स्यातां यस्य प्रसूतौ भवति खलु नरस्त्वन्यजातस्तदानीम् ।
ापि स्थाने स्थितौ स्तः कलुषखगयुतौ भाग्यषष्ठाधिनाथौ
देवं राहुणा वा तदनु च शिखिना संय्युतावन्यजातः ॥३॥

यस्य जन्मनि षष्ठाष्टमभवननाथौ कुजविधुयुतौ चतुर्थस्थौ यातां तदानीं स नरः अन्यजातः जारजातः। तथा नवमषष्ठाधिथौ यत्रकुत्रापि स्थितौ क्रूरग्रहयुतौ अथवा केवलेन राहुणा शिना वा युतौ स्यातां तदान्यजातः। कलुषखगयुतावित्येतेन राहुः तुरपि सर्वक्रूरयोगे विवक्षितः। अग्रिमश्लोके मन्दादीनां पार्थक्येन गोपदेशात् कलुषखगयुतावित्यनेनैव सिद्धे राहुकेतुग्रहणं छन्दोरोधात् ॥ ३ ॥

भावार्थ—जिसके जन्म समय षष्ठेश और अष्टमेश ये दोनों मङ्गल चन्द्रमा से युक्त होकर मातृभाव (४) में हों तो उसको परपुरुष उत्पन्न कहना। और यदि भाग्येश तथा षष्ठेश—ये दोनों पापग्रह से होकर किसी स्थान में बैठे हों, अथवा केवल राहु या केतु से क हों तो दूसरे से उत्पन्न समझना ॥ ३ ॥

कौ मन्देन शूद्रादथ भवति विदा वैश्यतो भास्करेण
त्राज्जातः सितेन त्रिदशपगुरुणा भूमिदेवात्प्रसूतः ।

दैत्येशेज्यौ सपापौ मदनरिपुधनस्थानगौ चेत्परस्त्री-
गामी व्योमारिपौ स्तो गगनभवनगौ तत्पितान्यारतः

भाग्यषष्ठाधिनाथौ मन्देन युक्तौ शूद्राज्जातः उत्पन्नो भवति
बुधयुक्तौ वैश्याज्जातः। भास्करेण युतौ चेत्क्षत्रियाज्जातः
क्राभ्यां ब्राह्मणाज्जातः। बुधगुरुशुक्राणां कलुषखगयुतत्वे
ष्टत्वे तद्योगेन नीचत्वेनास्तंगतत्वेन क्रूरवर्गस्थत्वेन वा सुधी
च्यम्। अथ शुक्रबृहस्पती सक्रूरौ सप्तमषष्ठधनस्थानगतौ
परस्त्रीगामी स्यात्। दशमषष्ठाधिपौ दशमस्थौ तदा तत्पिता
पिता अन्यारतः स्यात्परस्त्रीगामी स्यात्॥ ४॥

भावार्थ—भाग्येश और षष्ठेश—ये दोनों शनि से संयुत
शूद्र से उत्पन्न समझे। यदि बुध से युक्त हों तो वैश्य से, रवि
हों तो क्षत्रिय से, शुक्र अथवा बृहस्पति से युत हों तो
उत्पन्न जातक को समझे। यदि शुक्र और बृहस्पति पापग्रह
होकर सप्तम, षष्ठ, और द्वितीय स्थान में हों तो वह मनुष्य पर
होता है। यदि दशमेश और षष्ठेश दशम स्थान में हो तो उसका
पर-दार-गामी होता है॥

मूर्तीशः पापयुक्तो धनसदनगतश्चेत्तदा सज्जनस्त्री-
संयुक्तस्तत्पिता स्यात्खलविहगयुताः कामशत्रुस्व
कोशस्थास्तद्वदेवं फलमिति विविधं भ्रातृपत्न्योश्च
स्थानेशाः क्वापि भावे तनुपतिसहिताश्चेत्पुमानन्य

क्रूरयुक्तो लग्नेशः द्वितीयस्थश्चेत्पिता सज्जनस्त्रीसंयुक्त
जनस्त्रीगामी स्यात्। सप्तमषष्ठद्वितीयभावेशाः क्रूरयुताः
स्थाश्चेत्तद्वदेवं फलं विविधमित्येवंप्रकारैर्विविधफलमिति
सज्जनस्त्रियामासक्तिर्दुराचारत्वं अभक्ष्यभक्षकत्वमित्यादि

ावः । तृतीयसप्तमचतुर्थदशमेशास्तनुपतिसहिता यत्र कुत्रापि स्थिताश्चेज्जातः पुमान् जारजातः ॥ ५ ॥

भावार्थ—यदि पापग्रहसहित लग्नेश द्वितीय भाव में हो तो उसका ंता सज्जन की स्त्री से प्रेम करता है, और सप्तम षष्ठ तथा द्वितीय ाव के स्वामी यदि पापग्रह सहित होकर द्वितीय, स्थान में हों तो भी सका पिता सज्जन-स्त्री-गामी (दुराचारी, अभक्ष्यभक्षी) होता है । दि सहजेश, सप्तमेश, सुखेश, और दशमेश—ये लग्नेश के सङ्ग किसी ान में हों तो वह पुरुष दूसरे से उत्पन्न है—ऐसा समझना ॥ ५ ॥

ग्नाधीशेन्दुपुत्रौक्षितितनयनिशानायकौ क्वापि संस्थौ
ुक्तौ स्वर्भानुना वा भवति हि मनुजः केतुना श्वेतकुष्ठी ।
ादित्यो भौमयुक्तस्तदनु शनियुतो रक्तकृष्णाख्यकुष्ठी
ार्कोलग्नाधिनाथोव्ययरिपुनिधनस्थानगस्तापगण्डः ॥६॥

लग्नेशबुधौ कुजचन्द्रौ वा राहुकेत्वन्यतरयुतौ तदा जातः श्वेतर्णोपलक्षितकुष्ठरोगी भवति । तदनु भौमशनियुतः आदित्यश्चेद्रतवर्णकृष्णवर्णनामककुष्ठवान् स्यात् । सूर्ययुतो लग्नेशः त्रिकस्थश्चेदा जातस्य तापगण्डान्वितो गंडो रोगविशेषः स्यात् ॥ ६ ॥

भावार्थ—लग्नेश तथा बुध—ये दोनों अथवा मंगल और चन्द्रमा ादोनों किसी भाव में राहु अथवा केतु से देखे जाते हों तो वह मनुष्य ेत-कुष्ठी होता है । सूर्य यदि मंगल और शनि दोनों से युक्त होकर सी भाव में हो तो मनुष्य लाल और श्यामवर्ण कुष्ठ वाला होता है । द सूर्ययुत लग्नेश द्वादश, षष्ठ अथवा अष्टम स्थान में हो तो तापड नामक रोग से संयुक्त होता है ॥ ६ ॥

यश्चन्द्रेण गण्डो जलज इह युतो ग्रन्थिशस्त्रव्रणः स्याद्
ीपुत्रेण पित्तं हिमकरतनयेनाथ जीवेन रोगः ।

आमोद्भूतस्ततश्चेद्भृगुतनययुतो नुः क्षयाख्यो गदः
चौरोद्भूतोऽन्त्यजाद्वा यमशिखितमसामेकयुक् तन्व

चन्द्रेण युतो लग्नेशः त्रिकस्थश्चेज्जलजो गण्डः स्यात्।
युतो लग्नेशः त्रिकस्थश्चेत्तदा ग्रन्थिशस्त्रव्रणः स्यात् । ग्रन्थ
चितः शस्त्रजो व्रणः स्यादित्यर्थः । बुधयुतो लग्नेशः त्रिक
त्पित्तरोगः स्यात्। जीवेन युतो लग्नेशः त्रिकस्थश्चेत्तदा आमो
आमकोपजो रोगः स्यात्। शुक्रेण युतस्तत्र स्थितो लग्ने
नुर्मनुष्यस्य क्षयाख्यो रोगः स्यात् । यमशिखितमसामेकयुक्
राहुकेतूनां मध्ये एकेन युक्तो लग्नेशः त्रिकस्थश्चेत्तदा चौ
न्त्यजाद्रुत्पन्नो वा रोगः स्यात्। रजकचर्मकारादयोऽन्त्यजाः।

भावार्थ—यदि लग्नेश चन्द्रमा से युक्त त्रिक (६ । ८ ।
भवन में हो तो जल से उत्पन्न गण्ड रोग होता हैं । यदि मं
लग्नेश त्रिक भवन में हो तो गांठ (गँठिया) अथवा अ
(घाव) होता है। बुधयुक्त हो तो पित्त, बृहस्पति से यु
आँव रोग, शुक्र से युक्त हो तो क्षयनामक रोग, यदि शनि, के
राहु—इन तीनों में से किसी एक से युक्त लग्नेश त्रिक भ
तो चोर अथवा अन्त्यज (चाण्डाल आदि) हीन जाति
होता है ॥ ७ ॥

चन्द्रो मेषे वृषे वा कुजशनिसहितः श्वेतकुष्ठी स
दैत्येज्यारेन्दुमन्दास्तिमिभवनगताः कर्कटालिस्थि
अङ्गे सौख्येन हीनः परमकलुषकृद्रक्तकुष्ठी नरः
द्रागीशो भार्गवो वा यदि रिपुगृहपो मूर्तिगः क्र

कुजशनियुतश्चन्द्रो मेषे वृषे वा यदि तदा नरः श्वेतकु
शुक्रभौमेन्दुशनयो मीनराशिस्था यद्वा कर्कटवृश्चिकस्थाः

रीरसौख्यरहितः महापातकी रक्तकुष्ठी स्यात्। गुरुः शुक्रो वा
ष्ठभावाधिपः क्रूरैर्दृष्टो लग्नस्थश्चेत्तदा वक्त्रशोफी मुखाधिकरण-
श्वयथुरोगयुतः स्यादित्यग्रिमश्लोकेन सम्बन्धः ॥ ८ ॥

भावार्थ—यदि मंगल और शनि से युत चन्द्रमा मेष अथवा वृष
हो तो मनुष्य श्वेतकुष्ठवाला होता है और रोग सहित होता है।
दि शुक्र, मंगल, चन्द्रमा और शनि—ये मीन अथवा कर्क और
श्चिक राशि में हो तो शारीरिक सुख से रहित, महापाप करने वाला,
क्त कुष्ठी होता है। षष्ठभावाधीश गुरु अथवा शुक्र लग्न में हो और
पग्रह से ※ ॥ ८ ॥

दृष्टश्चेद्वक्त्रशोफी त्वथ खलसहिता मीनकर्कालिभावा
लूताकारश्चिरं स्यात्परमगदकरः कुष्ठ एवं नराणाम्।
रिःफस्थानांस्थतश्चेद्विबुधपतिगुरुर्गुह्यरोगी नितान्तं
भूमीमार्तण्डपुत्रौ व्ययभवनगतौ शत्रुगौ वा व्रणी स्यात्

अथ मीनकर्कवृश्चिकराश्युपलक्षिता भावाः क्रूरसहिता यदि
दा नराणां एवं प्रकारेण चिरं कुष्ठं स्यात्। तत्र प्रकारमाह।
त्र लूताकारकः सविशेषो जन्तुविशेषः उत्कृष्टगदविशेषकारः लूता-
रकक्रूरः गुह्यरोगी स्यात्। यद्वा वैद्याज्ञानरोगी स्यात्। भौम-
नी व्यये षष्ठे वा स्यातां तदा व्रणी व्रणयुतः स्यात्॥ ९ ॥

भावार्थ—‡ देखा जाता हो तो उसका मुख सोफरोग से युक्त
ता है। मीन, कर्क और वृश्चिक—इन राशियों में पापग्रह हो तो
मनुष्य को लूताकार नामक कठिन रोग करनेवाला कुष्ठ होता है।

※ अग्रिम श्लोक से सम्बन्ध है।

‡ पूर्व श्लोक की टीका से सम्बन्ध है।

यदि बृहस्पति द्वादश स्थान में हो तो मनुष्य गुह्यरोगी (जो रोग प्र में नहीं आवे उस रोग से युक्त) होता है। मंगल और शनि द्वादश अथवा षष्ठ भाव में हो तो व्रण (फोड़ा आदि) से होता है ॥ ९ ॥

मेषे मीने कुलीरे तदनु च मकरे वृश्चिके मन्दचन्द्रौ
स्यातां क्रूरान्वितौ चेन्नवमभवनजौ मानवः स्याच्च खञ्जः
लग्नस्थं पश्यतीन्दुं दिनमणितनयं भूमिजो द्यूनदृष्ट्या
बुद्ध्या हीनो नरः स्यादिनविधुविवरे भूमिजश्चेत्तथैव ॥

क्रूरग्रहयुतौ चन्द्रशनी मेषमीनकर्कमकरवृश्चिकान्यतमराशि नवमभवनगौ चेन्मानवो जातः खञ्जः खञ्जाख्यपादरोगी स्यात् भूमिपुत्रः सप्तमदृष्ट्या लग्नस्थं चन्द्रं शनिं च पश्यति चेत्तदा बुद्ध्या हीनः स्यात्। इनविधुविवरे रविचन्द्रयोर्मध्ये भौमश्चेत् बुद्धिहीनः स्यात्। इनशब्दो लक्षणया दिनकरपरो ज्ञेयः ॥ १०

भावार्थ—मेष, मीन, कर्क, मकर और वृश्चिक—इनमें से राशि में पापग्रह सहित शनि और चन्द्रमा नवम भाव में पड़ता हो वह मनुष्य खञ्ज (पाद रोग सहित) होता है। यदि लग्नगत चन्द्र अथवा शनि को सप्तम दृष्टि से मंगल देखता हो तो वह मनुष्य बुद्धि हीन होता है। यदि रवि और चन्द्रमा के बीच में मंगल हो तो वही फल समझना ॥ १० ॥

प्रालेयांशौ तनुस्थे गगनसदनगे साधिकारेऽर्कसूनौ
दृष्टेऽस्मिन्कामदृष्ट्या हिमकिरणभुवा बुद्धियुङ्मानवः स्यात्
पृथ्वीसूनुं मृगाङ्कं तनुनिलयगतं पूर्णदृष्ट्येन्दुसूनुः
पश्येच्चेदबुद्धिहीनस्त्वथशशितनुपौ भूभुवापीडितौ वा ॥

चन्द्रे लग्ने साधिकारे गृहहोराद्रेष्काणादिवर्गाधिपत्यसहिते
नौ दशमस्थे बुधेन पूर्णदृष्टेऽस्मिन्मानवो जातः बुद्धिमान् स्यात्।
मस्थं भौमं चन्द्रं च पूर्णदृष्ट्या बुधः पश्येत् चेद्बुद्धिहीनः स्यात्।
द्वा चन्द्रलग्नेशौ पूर्णदृष्ट्या पीडितौ बुद्धिहीनः स्यात्॥ ११॥

भावार्थ—यदि चन्द्रमा लग्न में हो तथा स्वगृहादि षड्वर्गाधिकारी, शनि दशम भाव में हो और दोनों पर बुध की पूर्ण दृष्टि हो तो नुष्य बुद्धिमान् होता है। तथा लग्नस्थ मंगल और चन्द्रमा को बुध र्ण दृष्टि से देखता हो अथवा चन्द्रमा तथा लग्नेश को मंगल पूर्ण दृष्टि से खता हो तो इन दोनों योग में उत्पन्न मनुष्य बुद्धिहीन होता है॥११॥

लग्नस्थे रौहिणेये तदनु रविशनी क्रूरदृष्टौ रिपुस्था-
वेकर्क्षे चैकभागे भवति गतमतिर्दृष्टिहीनौ शुभानाम्।
तिग्मांशौ वैरिनाथे खलविहगयुते तुर्यगे सूर्यसूनौ
हृद्रोगी वाक्पतौ वा भवति हृदि नरः कृष्णपित्ती सकम्पः॥

लग्नस्थे बुधे तदनु क्रूरग्रहदृष्टौ शुभग्रहदृष्टिरहितौ रविशनी एकराशौ अथवा एकभागे चक्रस्य‡ पूर्वार्द्धे परार्द्धे वा एकत्रगौ षष्ठस्थौ चेत्तदा गतमतिर्नष्टमतिः स्यात्। षष्ठभावनाथे सूर्ये क्रूरग्रहयुते तुर्यगे सति हृदि कृष्णपित्तरोगी स्यात्। अथवा दुष्टैः पीडितो हृदि प्रकंपः स्यात्॥ १२॥

भावार्थ—यदि बुध लग्न में हो, और सूर्य तथा शनि पाप ग्रह की दृष्टि से सहित और शुभ ग्रहों की दृष्टि से रहित एक राशि अथवा एक अंश में होकर षष्ठ भवन में हो तो मनुष्य बुद्धिहीन होता हैं। और षष्ठेश सूर्य पापग्रहयुक्त चतुर्थ भवन में हो तो मनुष्य हृदयरोगी होता है। यदि शनि अथवा बृहस्पति षष्ठेश होकर चतुर्थ भाव में हो तो

‡ अयमर्थो नात्र संगच्छते प्रथमं एकराशौ इति पाठात् एक नवांशे इत्येवं युक्तो भाति।

कृष्णपित्तरोग युक्त, पापग्रह से दृष्ट हो तो हृदय में कम्प रोग। मनुष्य का जन्म होता है ॥ १२ ॥

दुष्टैर्वा पीडितः सन्नथ कुज रविजो वाक्पतिर्बन्धुसंस्थ
हृद्रोगः स्यान्नराणां व्रण इह नियतं क्लेशकारी शरीरे।
पातालस्थो महीजस्तनयनिलयगाः सूर्यवित्सैंहिकेया
रन्ध्रस्थो भानुपुत्रो यदि जनुषि तदा स्यान्नरो दुःखभागी

अथ कुजः सूर्यजो गुरुश्च चतुर्थस्थो यदि तदा इहास्मिन् हृद्रोगाद्धेतोर्नराणां शरीरे क्लेशकारी व्रणः नियमेन स्यात। जन्मसमये भौमश्चतुर्थस्थः सूर्यबुधराहवः पंचमस्थाः शनिः मस्थः तदा जातो नरो दुःखभागी भवति ॥ १३ ॥

भावार्थ—यदि मंगल, शनि और बृहस्पति चतुर्थ भाव में हो उस मनुष्य को हृदयरोग और क्लेशकारक व्रण (घाव) शरी निश्चय होता है। यदि मंगल चतुर्थ भाव में हो और सूर्य, बुध, पञ्चम भाव में हो तथा शनि अष्टम में हो तो मनुष्य दुःखभागी होता

लग्नं पश्येन्निजर्क्षे यदि धरणिसुतः संस्थितः कातरः स्या
च्छायासूनुर्नभःस्थो यदि निशि जननं तद्वदत्रापि वाच्यम्
मूर्तौ भूमीतनूजे स्वजनकलहकृत् द्यूनगे स्वाधिकारा-
द्धीने भौमे वपुष्मान् परमयुधि रतस्तीक्ष्णभानुश्च नूनम्

स्वक्षेत्रस्थितो भौमो यदि लग्नं पश्येत्तदा जातः कातरः भी स्यात्। यदि शनिर्दशमस्थो रात्रौ जन्म चेदत्रापि तद्वाच्यं का स्यादित्यर्थः। लग्नगे भौमे स्वजनकलहकरः स्यात्। स्वाधिका द्धीने स्वगृहहोराद्रेष्काणादिरहिते सप्तमे भौमे वपुष्मान् दृढश अत्यन्तयुद्धप्रीतिमान् तीक्ष्णस्वभावश्च स्यात् नूनं निश्चयेन ॥१४

भावार्थ—यदि स्वराशिस्थ मंगल लग्न को देखता हो तथा श दशम स्थान में हो और रात्रि में जन्म हुआ हो तो वह मनुष्य का

भयभीत) होता है। यदि मंगल लग्न में हो तो अपने बन्धुओं में
कलह करने वाला होता है। यदि अपने अधिकार (स्वोच्चादि) से
न मंगल सप्तम भाव में हो तो वह सुन्दर शरीर वाला और संग्राम
प्रेम करने वाला होता है ॥ १४ ॥

श्येतां कामदृष्ट्या धरणिविधुसुतौ चेन्मिथः स्यात्तदानी-
मुच्चाकारोऽथ चन्द्रं शनिरविमहिजाश्चेत्प्रपश्यन्ति शीतः ।
क्षीणे प्रालेयभानौ धरणिजसहिते पापभूमिः खरः स्या-
न्मूर्तिस्थो ग्न नदृष्ट्या हिमकरतनयो वासवेज्यं प्रपश्येत् ॥

धरणिविधुसुतौ भौमबुधौ मिथश्चान्योन्यं सप्तमदृष्ट्या पश्येतां
तदानीं जात उच्चशरीरः स्यात्। अथ शनिरविभौमाश्चन्द्रं पश्यन्ति
तदा जातः शीतलस्वभावः स्यात् । शीतलत्वं जडत्वं मूर्खत्वमि-
त्यर्थः । क्षीणे चन्द्रे भौमसहिते पापभूमिः पापकृत् खरस्तीक्ष्णस्व-
भावः स्यात् । मूर्तिस्थो बुधः सप्तमस्थं गुरुं पश्येत्तदा जातो
हास्यासक्त इत्यग्रिमश्लोकेन सम्बन्धः ॥ १५ ॥

भावार्थ—यदि मंगल और बुध में परस्पर सप्तम दृष्टि हो तो जातक
उच्च शरीर वाला होता है। यदि शनि, रवि और मंगल चन्द्रमा को
देखते हों तो शीतल स्वभाव (मूर्ख) होता है। यदि क्षीण चन्द्रमा
मंगल से युक्त हो तो मनुष्य पापी और तीक्ष्ण स्वभाव होता है। यदि
लग्नस्थित बुध सप्तमदृष्टि से बृहस्पति को देखता हो तो मनुष्य
हास्यप्रिय होता है ॥ १५ ॥

हास्यासक्तः सभौमे हिमकरतनये स्याच्छुभर्क्षे कुजज्ञौ
चन्द्रर्क्षे वार्कदृष्टौ नरपतिविदुषो रञ्जने कोविदः स्यात् ।
पश्येत्काव्यं सितांशुर्व्ययविलयरिपुस्थानगो विस्मयालुः
क्षिप्रं वाक्स्फूर्तिमान् स्यात् कुजबुधशशिनो वीर्यवत्खेटदृष्टाः

अथ भौमसहिते बुधे शुभर्क्षे शुभग्रहराशौ यद्वा कुजज्ञौ सं
मन्दराशिस्थौ तदा राज्ञां विदुषां च रञ्जने हर्षोन्मुखीकरणे प्र
स्यात्। त्रिकस्थः चन्द्रः शुक्रं पश्येत्तदा विस्मयालुः विस्म
स्यात्। कुजबुधेन्दवो बलिष्ठग्रहदृष्टाश्चेच्छीघ्रं यथा स्यात्तथा
स्फूर्तियुक्तः स्यात्॥ १६ ॥

भावार्थ—यदि मंगल सहित बुध शुभग्रह की राशि में हो,
शनि की राशि (मकर, कुम्भ) में रहकर सूर्य की दृष्टि से युक्त
वह मनुष्य राजा तथा विद्वानों को प्रसन्न करने में अत्यन्त चतुर
है। यदि चन्द्रमा (१२, ८, ६) इन भावों में से किसी एक भा
होकर शुक्र को देखता हो तो जातक विस्मयालु (आश्चर्य
होता है। यदि मंगल, बुध और चन्द्रमा—ये बलवान् ग्रह से देखे
हों तो शीघ्र प्रत्युत्तर देने वाला होता है॥ १६ ॥

शुक्रज्ञौ द्यूनयातौ गगनविलयगौ मानवः पुंश्चलः स्या
कामाज्ञामन्दिरस्थौ कविधरणिसुतौ तद्वदाज्ञाम्बुयातौ।
काव्यारौ तद्वदिन्दोर्नभसि रविसुतादास्फुजिन्नीरयायी
तद्वत्कामास्पदस्था बुधसितशनयः स्वर्क्षगे भार्गवे हि॥

शुक्रबुधौ सप्तमाष्टमदशमगतौ तदा मानवः पुंश्चलो व्यभि
स्यात्। शुक्रभौमौ सप्तमदशमस्थौ तद्वत् पुंश्चलः स्यात्। शुक्र
चतुर्थदशमगौ तद्वत् पुंश्चलः स्यात्। चन्द्राद्दशमे शुक्रे शनेश्च
शुक्रस्तदा तद्वत् पुंश्चलः। शुक्रो स्वराशिस्थे शुक्रबुधशनयः स
दशमस्थाः तदा तद्वदित्यनुषंगः॥ १७॥

भावार्थ—यदि शुक्र और बुध सप्तम, अष्टम, दशम भाव में हो
अथवा शुक्र और मंगल सप्तम, दशम भाव में हो (२) अथवा
मंगल चतुर्थ, दशम भाव में हो (३) अथवा चन्द्रमा से दशम

शुक्र हो तथा शनि से चतुर्थ भाव में शुक्र हो (४) वा शुक्र, बुध,
नि दशम भवन में हों और अपनी राशि में हो तो इन पांच योगों में
पन्न मनुष्य पुंश्चल (परस्त्रीगामी) होता है ॥ १७ ॥

तलेयांशात्सिताद्वा दिनमणितनयस्तत्पुरोभागवर्ती
र्तौ चेच्चन्द्रशुक्रौ यदि तरणिसुतं पश्यतश्चायशाः स्यात् ।
फच्छेदो नराणामथ तपनसुते भूमिकेन्द्रेऽर्कयुक्ते दृष्टे
ाभ्यामुडुपाभ्यां यदि दिवसपतेश्चोपरागोऽत्र तद्वत् ॥१८॥

। चन्द्रात् शुक्राद्वा शनिस्तत्पुरोभागवर्ती तदग्रिमभावे स्थितः
न्द्रशुक्रौ लग्नस्थौ शनिं पश्यतश्चेत्तदा जातः अयशा अपकीर्तियुतः
ात् । अथ सूर्ययुते शनौ भूमिकेन्द्रे लग्नस्थे शुक्रचन्द्रदृष्टे सति
वसपतेः सूर्यस्य चोपरागो ग्रहणं तदा शेफच्छेदः लिंगच्छेदः
द्वदपकीर्तिः स्यात् ॥ १८ ॥

भावार्थ—यदि चन्द्रमा से वा शुक्र से आगे के भाव में शनि हो
था लग्न में चन्द्रमा और शुक्र होकर शनिको देखते हों तो वह मनुष्य
यशभागी होता है । तथा सूर्य सहित शनि लग्न में हो और शुक्र
वा चन्द्रमा से देखा जाता हो और सूर्य का ग्रहण हो तो इस समय में
त्पन्न मनुष्य को शेफ (लिंग) छेदन और अयश (अपकीर्ति)
ता है ॥ १८ ॥

ाते वक्रग्रहर्क्षे जनुषि भृगुसुते मानवस्तोषदायी
सीमन्तिन्या रतेः स्यान्न खलु मदनगं भार्गवं लग्ननाथः ।
श्येत्स्वीयालयस्थो यदि रहसि तदा कामिनीतोषदाता
स्यादेवं हिमांशुर्दिनकरसुतयुक् भौमतः खे सुखे वा ॥

शुक्रे वक्रग्रहराशिगते सति मानवो जातः सीमन्तिन्या रतेः
सम्भोगाद्धेतोस्तोषदायी सुखदायी सुखदो न स्यात् । स्वीयालयस्थो

लग्ननाथः सप्तमगं भार्गवं यदि पश्येत्पूर्णदृष्ट्या इति शेषः तदा रहसि रतिस्थाने कामिनीतोषदाता न स्यादिति। चन्द्रः शनि भौमाच्चतुर्थे दशमे वा स्यात्तदा एवमुक्तप्रकारेण कामिनीतो न स्यादेव ॥ १९ ॥

भावार्थ—यदि जन्म समय शुक्र वक्रीग्रह की राशि में हो तो मनुष्य स्त्री को सम्भोग से प्रसन्न करने वाला नहीं होता है। लग्नेश अपनी राशि में स्थित होकर सप्तम भावस्थित शुक्र को हो, अथवा शनियुक्त चन्द्रमा यदि मंगल से दशम वा चतुर्थ गृह में तो वह मनुष्य सम्भोग से स्त्री को सन्तुष्ट नहीं कर सकता है ॥

क्षोणीपुत्रेण युक्तः प्रथमसुरगुरुर्लग्नतः षष्ठपोऽयं
कामाधिक्यं नराणां जनयति नियतं पापदृष्टो विशेष
काव्ये स्वीयालयस्थे तदनु मिथुनगे कामवान्मानवः
न्मूर्तौ सप्ताश्वसूनौ धनुषि च वृषभे चेत्पुमानल्पकामः

प्रथमसुरगुरुः शुक्रः भौमयुक्तोऽयं लग्नात् षष्ठपः षष्ठभाव तदा जातानां नराणां कामाधिक्यं कामबलप्रचुरतां नि जनयति। स शुक्रः पापदृष्टश्चेद्विशेषात्कामाधिक्यं जनयति। शुक्रे स्वभवनस्थे मिथुनस्थे वा मानवः कामवान् स्यात्। सप्त पुत्रः शनिः धनुषि वृषे वा लग्ने चेत्तदा मानवोऽल्पकामः स्यात्

भावार्थ—प्रथम सुरगुरु (शुक्र) मंगल से युक्त होकर षष्ठ का स्वामी हो तो उस मनुष्य को कामोद्वेग बहुत होता है, यदि ग्रह से देखा जाता हो तो विशेष करके काम का वेग होता है। शुक्र अपनी राशि में हो या मिथुनराशि में हो तो मनुष्य कामी है। यदि शनि लग्न अथवा धनु और वृष में हो तो वह मनुष्य कामी होता है ॥ २० ॥

न्दे नक्रेऽल्पभाषीत्यथ रिपुगृहपे वा सुधांशावदृश्ये
द्धे संस्थितेऽङ्को भवति जनिमतां नेत्रयोः क्रूरयुक्ते ।
श्येत्क्षीणं न चन्द्रं यदि भृगुतनयः सूर्यजः पश्यतीन्दुं
र्के चन्द्रे नभस्थैर्यदि मदनगतैर्वीक्षिते पापखेटैः ॥२१॥

शनौ मकरस्थे सति अल्पभाषी अप्रयोजनबहुभाषी भवति । दनु षष्ठभवननाथे चन्द्रे वा क्रूरयुते अदृश्यार्धे संस्थिते सति जनितां नेत्रयोरंकश्चिह्नविशेषो भवति । सप्तमभावभोग्यांशारभ्याष्टमादिक्रमेण लग्नभुक्तांशपर्यंतमदृश्यार्धं ज्ञेयम् । यदि क्षीणं चन्द्रं शुक्रो पश्येत् शनिरिन्दुं पश्यति कर्कस्थे चन्द्रे दशमे सप्तमे वा स्थितैः क्रूरग्रहैर्दृष्टे तदा नूनं निश्चयेन स्वल्पनेत्रः स्यादित्यग्रिमपद्येनान्वयः ॥

भावार्थ—यदि शनैश्चर मकर में हो तो वह मनुष्य अप्रयोजनभाषी होता है । तथा षष्ठेश वा चन्द्रमा पापयुक्त होकर अदृश्य चक्रार्ध में पड़े तो नेत्र में अंक (चिन्ह) होता है । यदि क्षीण चन्द्रमा को शुक्र न देखता हो और चन्द्रमा को शनि देखता हो, तथा चन्द्रमा अपनी राशि (कर्क) में हो तथा सप्तम दशमस्थित पाप ग्रह से देखा जाता हो तो मनुष्य निश्चय ही छोटे नेत्र वाला होता है ॥ २१ ॥

स्यान्नूनं चाल्पनेत्रस्तदनु तनु गतं भूमिजं वा क्षपेशं
पश्येद्वाचस्पतिश्चेदसुरकुलगुरुः काणदृङ्मानवः स्यात् ।
विच्छाया तिग्मभानोः क्षिति भुवि च पुरोभागगे दृङ् नराणां
सौम्ये चिह्नं दृशि स्यादथ वपुषि लये भार्गवे क्रूरदृष्टे॥२२॥

तदनु लग्नस्थं भौमं चन्द्रं वा वाचस्पतिः शुक्रश्च पश्येच्चेत् मानवः काणनेत्रः स्यात् । तिग्मभानोः सूर्यात्पुरोभागगे अग्रगामिनि अस्ताभिलाषिणि भौमे नराणां दृक् विच्छाया कान्तिरहिता स्यात् ।

सूर्यात् बुधे पुरोभागगे दृशि चिह्नं स्यात्। अथ भार्गवे शुक्रे स्थेऽष्टमे वा क्रूरदृष्टे सति अश्रुपाताद्धेतोर्नेत्रपीडा स्यादि श्लोकेन सम्बन्धः ॥ २२ ॥

भावार्थ—यदि लग्नस्थित मंगल अथवा चन्द्रमा को बृह शुक्र देखता हो तो जातक काणा (एक आँख से अन्धा) हो यदि सूर्य से अग्रिम भाव में मंगल हो तो उस समय की दृष्टि हीन होती है। सूर्य से अग्रिम भाव में बुध हो तो जातक की चिन्ह होता है। यदि शुक्र लग्न अथवा अष्टम भाव में पाप ग्रह जाता हो तो जातक की आँख में अश्रुपात से पीड़ा होती है॥ २

नेत्रे पीडाश्रुपातात्तदनु शशिकुजावेकभावे यदाक्ष्णो-
श्चिह्नं किञ्चित्तदानीं ग्रहबलवशतो दृश्यमेवं सुधीभिः।
मार्तण्डे रिःफयाते तदनु नवमगे पुत्रगे वा खलाढ्ये
दृष्टे वा स्यान्मनस्वी सुविकलनयनः सूर्यजे व्याधियुक्

तदनु चन्द्रभौमौ एकभागैकनवांशस्थौ तदा नेत्रयोः चिह्नं स्यात्। सुधीभिर्योगकर्तृग्रहबलवशात् एवमुक्तप्रकारेण वक्तव्यं। तदनु क्रूरग्रहदृष्टे युते वा सूर्ये व्ययगे वा नवमे सति सुविकलनेत्रोऽप्रशस्तनयनः स्यात्। सूर्यजे शनौ क्रूरयुते दृष्टे क्रूरे द्वादशगे नवमपंचमगे वा व्याधियुक्तो रोगी स्यात् ॥ २३

भावार्थ—यदि चन्द्रमा और मंगल एक भाव (अथवा एक में हो तो दोनों नेत्रों में कुछ चिह्न होता है इत्यादिक ज्योतिषी बल देख कर कहै। यदि सूर्य द्वादश, नवम वा पञ्चम भाव में होकर पापग्रहों से युक्त अथवा दृष्ट हो तो वह जातक मनस्वी विकलनेत्र होता है। इस प्रकार (द्वादश नवम, पञ्चम भाव में पा से युक्त दृष्ट) शनैश्चर हो तो जातक रोगी होता है ॥ २३ ॥

न्द्रं पृष्ठोदयस्थं हिबुकगृहगतः सूर्यसूनुः प्रपश्ये-
द्दित्थं लग्नाधिनाथे क्रियभवनगते मानवो वामनः स्यात् ।
तीशे पीयूषभानुर्जलचरगृहगः सौरिणा संयुतो वा
ार्तण्डे भूमिकेन्द्रे यदि भवति तदा दद्रुमान् पूरुषः स्यात् ॥

पृष्ठोदयराशिगं चन्द्रं चतुर्थभावस्थः शनिः प्रपश्येत् । लग्नपे
पराशिस्थिते जातो मानवो ह्रस्वकायः स्यात् । जलचरराशिस्थ-
न्द्रः द्वितीये अथवा शनिना युक्ते अथवा सूर्ये लग्नगे यदि तदा
रुषः दद्रुमान् कुष्ठयुक्तः स्यात् ॥ २४ ॥

भावार्थ—यदि चन्द्रमा पृष्ठोदयराशि (मेष, वृष, कर्क, धनु, मकर)
हो और शनि से देखा जाता हो तथा लग्नेश मेष में हो तो जातक
ामन (छोटा अवयववाला) होता है। यदि जलचर राशिस्थ चन्द्रमा
द्वितीय भाव में हो, अथवा शनैश्चर से युक्त हो, अथवा सूर्य यदि लग्न
हो तो मनुष्य दद्रु (दाद) से युक्त होता है ॥ २४ ॥

दृष्टेक्रूरैर्न सौम्यैर्यदि ...
देवं कामांगनाथे तदनु रविसुतस्तुर्यगो नष्टदृष्टिः ।
प्लीहो स्याल्लग्ननाथे दिनकरतनये क्रूरनिष्पीडिते चेत्
सौख्यायुङ्मानवः स्यात्तनुसदनगते प्लीहवान्हर्षहीनः ॥

षष्ठभावाधिपे चन्द्रे सौम्यदृष्टिरहिते केवलं क्रूरैर्दृष्टे प्लीहपीडितः
स्यात्। एवं कामांगनाथे सप्तमनाथे लग्ननाथे चन्द्रे केवलं क्रूरदृष्टे
प्लीहवान् स्यात् । पापग्रहैर्दृष्टः शनिश्चतुर्थश्चेन्नष्टदृष्टिः अन्धः
स्यात् । क्रूरग्रहैः निष्पीडिते दृष्ट्या योगेन वा विकलीकृते यद्वा
विजिते लग्नेशे शनौ सौख्ययायुक् सौख्यरहितः स्यात्। लग्नगते
शनौ प्लीहवान् आनन्दरहितश्च स्यात् ॥ २५ ॥

भावार्थ—यदि चन्द्रमा षष्ठेश होकर शुभग्रह की दृष्टि से [...]
केवल पापग्रह से देखा जाता हो तो जातक प्लीहा (तापतिल्ली) [...]
रोग से युक्त होता है। एवं सप्तमेश अथवा लग्नेश होकर चन्द्र [...]
ग्रहों से देखा जाता हो तो प्लीहयुक्त होता है। यदि चतुर्थ [...]
स्थित शनि पापग्रह से देखा जाता हो तो मनुष्य नष्टदृष्टि ([...]
होता है। और लग्नेश शनि पापग्रह से युक्त अथवा दृष्ट हो तो [...]
सुख-रहित होता है। और लग्न में शनि हो तो प्लीह (ताप[...]
युक्त तथा हर्ष से रहित होता है ॥ २५ ॥

क्रूराः केन्द्रालयस्था वपुषि च विकलः केन्द्रगौ पुष्प[...]
किं वा लग्ने प्रपश्येत्कविमिनतनयः श्रोणिभागेऽङ्गही[...]
काव्यः पातालयायीसुरपतिगुरुणा क्वापि युक्तोऽर्क[...]
भौमो वा रौहिणेयो भवति हि विकलः श्रोणिभागे भुजे [...]

यदा क्रूराः केन्द्रगास्तदा जातः वपुषि शरीरे विकलः विक[...]
स्यात्। पुष्पवन्तौ सूर्यचन्द्रौ केन्द्रगौ वा तदा विकलाङ्गः[...]
